- Title – व्रतार्क विधि
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 59/118
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – - संस्कृत
- Period –
- Beginning – वास रावणगत कराघव यावत्पूजां समाप्येहं तावत्त्वं सान्निध्यो भवेति सान्निध्यापनं रघुनायक राजर्षे नमो राजीवलोचन रघुनन्दनमेदेव श्री रामाभिमुखो भवेति।
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - रामनवमी व्रत से सम्बन्धित
- Revisor -
- Author - अज्ञात
- Remarks- 3-49, 69-200 अनुपलब्ध, अपूर्ण

उपासना

व्र०
१

ध्यासरावसांतक राघव यावत्पूजां समाप्येहं तावत्त्वं सन्निधौ भवेति सन्निधापनं रघुनायक
राजर्षे नमो राजीवलोचन रघुनंदन मे देव श्रीरामाभिमुखो भवेति संमुखीकरणम् राजा
धिराज राजेंद्र रामचंद्र महीपते रत्नसिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो [illegible] पुरुष एवेत्यासनं
त्रैलोक्यपावनानंत नमस्ते रघुनायक पाद्यं गृहाण राजर्षे नमो राजीवलोचन एतावान
स्येति पाद्यं परिपूर्णपरानंद नमो रामाय वेधसे गृहाणार्घ्यं मया दत्तं कृष्ण विष्णो जनार्द
न त्रिपादूर्ध्वेति अर्घ्यम् नमः सत्याय शुद्धाय दिव्याय ज्ञानरूपिणे गृहाणाचमनं नो
थ सर्वलोकैकनायक तस्माद्विराडित्याचमनं नमः श्रीवासुदेवाय तत्त्वज्ञानस्वरूपि
णे मधुपर्कं गृहाणेमं जानकीपतये नमः मधुपर्कं पंचामृतं मयानीतं पयोदधिघृ
तं मधु सशर्करं तत्पादत्तं राम त्वं प्रतिगृह्यतामिति पंचामृतस्नानं ब्रह्मांडोदरमध्यस्थै
स्तीर्थैश्च रघुनंदन स्नापयिष्याम्यहं भक्त्या संगृहाण जनार्दन यत्पुरुषेणेति स्नानं
संतप्तकांचनप्रख्यं पीतांबरमिदं हरे संगृहाण जगन्नाथ रामचंद्र नमोस्तुते तं यज्ञमि

इति रामव्रतिमाहात्म्यसहितं रामनवमीव्रतम् अथ रामनवमीव्रतपूजाविधिः आचम्य प्राणाना
यम्य मासपक्षाद्युल्लिख्य सकलपापक्षयकामो वा श्रीरामप्रीतये श्रीरामनवमीव्रतमहं करि
ष्ये इति संकल्प्य: फलपुष्पाक्षतसहितं जलपूर्णताम्रपात्रं गृहीत्वा उपोष्य नवमीं त्वद्य या
मेष्वष्टसु राघव तेन प्रीतो भव त्वं भो संसारात्त्राहि मां हरे इति मंत्रेण पात्रस्थजलं क्षिपेत्ततः
शक्तितो हेमीं राममूर्तिं कृत्वाग्न्युत्तारणपूर्वकं कपोलौ स्पृष्ट्वा मूलमंत्रं प्रणवादिचतुर्थ्य
न्तं नाम रामाय देवत्वं स्वाहेति मंत्रं पठन् प्राणप्रतिष्ठां कुर्यात् ततः कोमलांगं विशाला
क्षमिंद्रनीलसमप्र× संख्याये ×भं दक्षिणांगे दशरथं पुत्रावेक्षणतत्परं पृष्ठतो लक्ष्मणं दे
वं सच्छत्रं कनकप्रभम् पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ अग्रे व्यग्रं हनूमंतं रामानुग्र
हकांक्षिणमिति ध्यात्वा षोडशोपचारैः पूजयेत् आवाहयामि विश्वेशं जानकीवल्ल
भं विभुम् कौशल्यानंदनं विष्णुं श्रीरामं प्रकृतेः परं सहस्रशीर्षेत्यावाहनम् श्रीरामा
गच्छ भगवन्रघुवीर नृपोत्तम जानक्या सह राजेंद्र सुस्थिरो भव सर्वदा रामभद्र महे०

श्री०
२

हाणदीपकं चैव त्रैलोक्यतिमिरापहम् ज्ञालरूपोस्त्वेति दीपः इदं दिव्यान्नममृतं रसैः षड्भिः समन्वितं
रामराजेन्द्र नैवेद्यं सीतेश प्रतिगृह्यताम् चंद्रमामनसद्गति नैवेद्यम् ततश्चाचमनं इदं फल
मिति फलम् नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् तांबूलं गृह्यतां राम कर्पूरादिसम
न्वितम् नाभ्या आसीदिति तांबूलम् हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफ
लदमतः शांतिं प्रयच्छ मे सप्तास्यासन्निति दक्षिणा नृत्यगीतादिवाद्यादिपुराणपठनादिभिः
पूजोपचारैरखिलैः संतुष्टो भव राघव मंगलार्थं महीपाल नीराजनमिदं हरे संगृहाण जग
न्नाथ नारायण नमोस्तु ते इति नीराजनम् नमो देवाधिदेवाय रघुनाथाय ~~रघुनाथाय~~ शा
र्ङ्गिणे चिन्मयानंदरूपाय सीतायाः पतये नमः इति नमस्कारः सर्वलोकशरण्याय रामचं
द्राय वेधसे ब्रह्मानंदैकरूपाय सीतायाः पतये नमः इति पुष्पांजलिः यानि कानि च पापानि
ब्रह्महत्यासमानि च तानि तानि प्रणश्यंति प्रदक्षिणपदे पदे प्रदक्षिणा अशोककुसुमैर्यु
क्तं रामायार्घ्यं निवेदयेत् दशाननवधार्थाय धर्मसंस्थापनाय च राक्षसानां विनाशाय दै

२

त्रिवस्त्रम् श्रीरामाच्युतयज्ञेश श्रीधरानंतराघव ब्रह्मसूत्रं सोत्तरीयं गृहाण रघुनंदन तस्मा
द्यज्ञादिति यज्ञोपवीतम् कुंकुमागरुकस्तूरीकर्पूरोन्मिश्रचंदनं तुभ्यं दास्यामि राजेंद्र
श्रीराम स्वीकुरुष्व भो तस्माद्यज्ञात्सर्वहुतस्त्वद्इति चंदनं अक्षतान् तुलसीकुंदमंदारजा
तीपुन्नागचंदनैः कदंबकरवीरैश्च कुसुमैः शतपत्रकैः नीलांबुजैर्बिल्वपत्रैः पुष्पमाल्यै
श्च राघव पूजयिष्याम्यहं भक्त्या संगृहाण जनार्दन तस्मादश्वा इति पुष्पं अथांगपूजा
श्रीरामभद्राय नमः पादौ पूजयामि राजीवलोचनाय गुल्फौ रावणांतकाय जानुनी
विश्वामित्रप्रियाय नाभिं परमात्मने नमः हृदयम् श्रीकंठाय कंठं सर्वास्त्रधारिणे
बाहू रघूद्वहाय मुखं वाचस्पतये विश्वरूपाय जंघे लक्ष्मणाग्रजाय कटिं विश्वमूर्तये
मेढ्रं पद्मनाभाय जिह्वां दामोदराय दंतान् सीतापतये ललाटं ज्ञानगम्याय शिरः सर्वा
त्मने सर्वांगम् इत्यंगपूजा वनस्पतिरसो धूपो गंधाढ्यः सुमनोहरः रामचंद्र महीपाल
धूपोयं प्रतिगृह्यताम् यत्पुरुषमिति धूपः ज्योतिषां पतये तुभ्यं नमो रामाय वेधसे गृ

वद्दे×२ शुक्ला×२ नचंद्रोदयव्यापिन्यां×३

म.ल. तैतेयोत्तरात्तिथिः तदातस्यांनरैःकार्यंमहालक्ष्मीव्रतंसदेति प्रारंभस्तस्यांज्येष्ठायुक्तायांक. नि
१५. तथाचस्कांदे मासिभाद्रेसितेपक्षेज्येष्ठाऋक्षेप्रारब्धंवंव्रतं तच्चमहालक्ष्मीयतात्मभिरिति
८म. तच्चैवेकैवत्नायामपिसमापनंतुयस्कन्दमाहस्यांकार्यं चंद्रोदयव्रतेचैवतिथिस्तात्कालि
कीस्मृतेत्युक्तेः दिनद्वयेचंद्रोदयसत्त्वेसत्त्वेवाकृष्णपक्षेअष्टमीचैवेसाहिवाक्यात्सर्वैवपर
दिनेचंद्रोदयोत्तरंत्रिमुहूर्तान्चेत्सरेवतदुक्तंमदनरत्नेपुराणसमुच्चये पर्वांवापराविद्धा
वाग्रह्याचंद्रोदयेसदा त्रिमुहूर्तोत्तमाकृष्णापरतस्त्वोर्ध्वगामिनीति अथव्रतविधिः हेमाद्रौ
मदनरत्नेचस्कांदे स्कंदउवाच सौभाग्यजननंस्त्रीणांदौर्भाग्यपरिकृंतनं परमैश्वर्यजनन
नंतद्व्रतंब्रूहिशंकर ईश्वरउवाच साधुसाधुमहावाहोपृष्टोहंयत्त्वयानघ तत्तेहंसंप्रव
क्ष्यामिव्रतानामुत्तमंव्रतं येनचीर्णेननरोदुर्गतिंयातिकर्हिचित सुभगादुर्भगावापि १५.
स्त्रियोनविधवाग्रह शांतिदेव्याव्रतेएवंमहालक्ष्म्याःप्रजानेन नाशलोकचनराणांचस

दूर्वांकुरस्यां संप्रमाविधिना यौवनेश्रियं यौवनं स्थिरमाप्नोति यत्र यत्राभिजायते भविष्योत्त
रे तु विशेषतः अष्टम्यां फलपुष्पैश्च खर्जूरैर्नालिकेरकैः द्राक्षामोदकपिष्टैश्च बदरैर्लकुचैस्त
था नारंगैर्जंबुकेराम्रे वीजपूरैश्च दाडिमैः दध्यक्षतैस्सुगोभिश्च धूपैर्नैवेद्यदीपकैः मंत्रेणाने
न राजेंद्र श्रृणुष्वावहितो मम त्वं दूर्वेमृतनामासी इत्यादि मंत्रः प्राग्वत् दत्वार्घ्यं द्विजेभ्यः फ
लं च विविधं प्रभो तिलपिष्टकगोधूममधान्यपिंडानि यांउव भोजयित्वा सुहृन्मित्र संबंधिस्व
जनांस्तथा ततो भुंजीत तत्रैवं स्वयं श्रद्धासमन्वितः कर्तव्याचैकभक्तेन यथैषाम्लं यदाभवेत् दू
र्वामभ्यर्च्य येद्रध्यानवंध्यादेव संतत्यै पक्षे भाद्रपदस्यैवं शुक्लाष्टम्यां युधिष्ठिर दूर्वाष्टमीव्रतं पुण्यं
यः करोतीह मानवः न तस्य क्षयमाप्नोति संतानं स्यात् पयोरूपं नंदते वर्द्धते नित्यं संशयः दूर्वा त
या कुलं इति दूर्वाष्टमीव्रतम् भाद्रशुक्लाष्टमीमारभ्य षोडशदिनपर्यंतं महालक्ष्मीव्रतम्
तथा ईशाज्ञातिक्रमवार्ज्यामष्टम्यां कार्यं तदुक्तं चंद्रप्रकाशे स्मृत्यंतरे अर्द्धरात्रमतिक्रम्य व

श्री.के.
१५१

सृष्टिस्थितिविनाशानां कारणं भक्तवत्सलः रामस्याद्रौ तपस्यंति ब्रह्मविष्णुमहेश्वराः तिस्रः
संध्यामूर्त्तिमत्यस्तेषां मुख्यपद्मे रताः प्रविश्य तां महालक्ष्मी शक्तिरूपेण संस्थिता सर्वशक्ति
युता देवी लोकानां हितकाम्यया इत्युक्त्वांतरितं गत्वा कोलासुरवधाय ये निवेद्य निरवि
ले तेभ्यः तस्थुः प्रांजलयो जनाः तच्छ्रुत्वा निरविलं तेभ्यो ब्रह्मविष्णुमहेश्वराः संध्यात्रयं स
माहूय वचः प्रोचुर्जनेश्वराः वेदारसुरवंदेंदुमौलिमाणिक्यमंडलाः हनिष्यति महालक्ष्मी
व र्युद्धे कोलासुरं रिपुं भगवत्यो मूर्त्तिमत्यो दंष्ट्राकाराः त्रिपिर्वरेः आयुधैर्विविधैः कृत्वा जपमा
साद्य संयुगे युष्माकं च सहायोसौ युष्म क्रोधसमुद्भवः भूतनाथोभूत पन्नर्वः सहायो
भविष्यति इत्युक्त्वा त्वरितं गत्वा ह्रुहूधुः कोलरासुर निरुध्य च पुरीं देव्यो जगर्जुर्जलदस्वनाः
मिथ्ये सप्त दिशां दुंदुभे वर्धयन्त्या ततस्तु तां कोलासुरो पि तच्छ्रुत्वा प्रोत्साय तत महासनात् १५१
रोषणः क्रोधतास्राक्षो मेणेरिव मृगांतकः हस्त्यश्वरथपादातिचतुरंगबलान्वितः निर्य

देवाश्रित माहात्म्यं मर्त्ये केन प्रकाशितं विधानं कीदृशं ब्रूहि
वेनस्वामी महाविभो ईश्वर उवाच ×१

वेदः स्वापरं तथा स्कंद उवाच देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा वृत्रेसुराणामधिपे देवानां
च पुरंदरे तत्र देवैर्महावीर्यैर्नारायणबलाश्रयात् असुरा निर्जिताः सर्वे पातालतलमाय
प्रविष्टा बभुः केचित्लोकं गताः केचित्केचित्सुमहाबलाः तत्र कोलासुरो नाम महावीर्यो महाबलः
रूणालयं गोमंतदुर्गमंदुर्गं गिरिमाश्रित्य निर्भयः यो राजकेसकालोके रूपवान्सो महागुणाः भानी
॥गिरिदुर्गं यगिरिदुर्गस्थो रमयामास सर्वशः रमयित्वा स्त्रियस्तत्र कामरूपी विहंगमः एकं तस्मिन्नेव का
समाप्र लेतस्मात्ततो मुनिसत्तमो श्रुतप्रभावसंपन्नो उत्तमस्यो गोत्तमः सह तीर्थयात्राप्रसंगेन श्रु
त्य×२ त्वा वाक्यं जनश्रुतं कोलासुरे राजनितं कस्माहेतोः शिरविधज तावद्वचन सर्वमग नं
स्त्योस्ति महामुनिः येन पार्थेनिधिः पीतो विंध्याद्रिस्तनिवारितः वातापील्वलनामानौ
दैत्यौ येन विनाशितौ तं गच्छामो वयं सर्वे कोलासुरवधाय वै इत्यामंत्र्य जनाः सर्वे गत्वा तु मनि
वार्यैव ऊचुः सर्वे यथावत्तं कोलासुरविचेष्टितम तच्छ्रुत्वा भगवानाह मे चावरुणि धीः

स्त्य=२

ग्र

व्र.कं.
१५२

धनुर्धरो भूत्वा बाणजालमिवाकिरत् तासां शरीरमर्माणि भिंदन् शरप्रयोगमैः ननाद बहु वै
रोमोहृदयं वक्षैर्नखरैः ततः क्रुद्धतरास्ताह्रुतं पादैर्नगद्रुमैर्भृशं आकाशे भ्रामयित्वा तं दैत्ये
युर्गगने क्रुधा कोलास्तरोपि पतितो यावद्भुस्यात् पिष्टति तावन्निर्गतस्तलस्मीत्तपारा भौत्र
त्यपीडयत् तस्मात् पादिते रक्तो विदृस्तनयने भृशं मुक्तकंठः स्वनं कृत्वा ततो मोहमुपे
यिवान् ततो देवाः सगंधर्वा मनुष्या ऋषयस्तु वन् देवतां पापास्वरे व्यग्रनं तु समदा
कुल्ताः देवदुंदुभयो नेदुः पुष्पवृष्टिं पपात ह दिशः प्रसेदुर्मरुतो ववुर्मंदरं जगात् सुरा
सुरशिरोरत्नवंद्यपादांबुजास्ततः देवोऽदिकेन यानेन ययौ तिकोलापुरं प्रति आयांतीं पद्म ९ः
पा जांवी सम्मुक्तदायु [illegible] लः तुष्टाव परया भक्त्या राजकन्यागणो मुदा राजेकन्याऊचुः
वंदारुवीरसुरवृंदकिरीटकोटिरोचिर्घटानिकरकालितरत्नदीपं देवि त्वदीयचरणं श १५२
रणं जनानां सेवामहे सकलकामविवर्द्धनाय उत्फुल्लकैरवदलायतलोचनायै गेगे

ना द्रौ×२ मx२

योद्धुंतयोर्द्धुं कालिकायाऽस्वामिनिः सकुंडलशिरस्त्राणः कवचीधृतवाणधिः वद्धगोधांगु
लित्राणः कुर्वतुरश्वापरः ततोराक्षससैन्येततःमलनाथेनसंगतम् देवनारीमनोल्लासिपु
ष्पवृक्षेतिभीषणं महारवैर्भीमघोषैर्वीणाकैकारनिःस्वनैः निस्वाननिर्दै गोवलोकं श
हमयोभवत् जयमित्थीतिवदंतोधावतामितरेतरम् ववधेसमरेघोरेमुष्टामुष्टिकचा
कचि उद्यतेराक्षसबलेमलनाथोमहाबलः ममर्दराक्षसानीकंपादैरतिदारुणैः हतं
दृष्ट्वासुरबलं क्रुद्धः कोल्हासुरोरणे अभिद्रुत्यगदापाणिस्ताडयामासभैरवं ययोमर्ष्ण
महावीर्यस्तेनाभिहतमस्तकः ततोदेव्योतिवेगेनअभिद्रुद्रुवुरुद्धतैः त्रिशूलैरभिजघ्नुस्तं प
श्र रिशैर्व्यदारयन् मुष्टिभिस्ताडयामासुर्नखैरेवव्यदारयन् पादघातैस्समाजघ्नुः शिरःक
रिवरंयथा सकुंडलशिरस्त्राणोदष्टोष्ठोरक्तलोचनः कृतभ्रुकुटिवक्त्रोसौराक्षसस्तान्मुहुर्मु
हुः गदयाताडयामासशिरःकेशांश्चकुक्षिषु वभंजुस्तांगदांतान्हस्तेस्याः समराकुलाः ततो

२

१ ७: स्र

म॰ र्क॰   गृहात् न संततिनिवहैस्तत्र गीतवादित्रनिस्वनैः पुरंदेआ महालक्ष्म्याः करहाटपुरेति
१५२   ष्ठि एवंप्रभावा सा देवी विष्णुरामा षडानना व्रतस्यास्य विधानेन च स्मरणं चैतद्विधानतः
मासि भाद्रपदे शु॰ पक्षे ज्येष्ठायुताष्टमी आरभ्य वै व्रतं तत्र महालक्ष्म्या यतात्मभिः क
रिष्यामि व्रतं देवि त्वद्भक्त्या त्वत्परायणा: तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः इ
त्युच्चार्य ततो बध्वा दोरकं दक्षिणे करे षोडशग्रंथिसहितं गुणैः षोडशभिः कृतं त
तो त्वहं महालक्ष्मीं पूजयेन्नियतात्मवान् गंधैः पुष्पैः सनैवेद्यैर्यावत्कृष्णाष्टमी दि
नं तस्मिन्दिने तु संप्राप्ते कुर्यादुद्यापनं व्रती वस्त्रमंडपिकां कृत्वा माल्यरत्नोपशो
भितां विभूषिकां च संस्नस्यां नानादीपैश्च शोभितां चतस्रः प्रतिमां कृत्वा सौवर्णी
स्तस्य रूपिणीः स्नपनं कारयेत्तासं पंचामृतविधानतः षोडशैरुपचारैश्च धूपदीपा   १५३
दिभिस्तदा जागरं तत्र कर्तव्यं गीतवादित्रनिःस्वनैः ततो निशीथे संप्राप्ते भ्युदितै

ल्लसच्चंचलकुंडलमंडितायै राकाशशिप्रतिमराननकोमलायै तस्यै नमः कमललोच
नवल्लभायै सद्भक्तकल्पलतिकांहरिकंठभूषांकेयूरहेमकटकोज्वलकंकणांकां संसा
रसागरमुखं च ततो ममाद्य देहि त्वदीय करपद्ममनेगमातः इच्छादेवि जनाज्ञयाथ
विविधान्नसाधियत्नंगताः विष्णोर्वक्षसि याचकार तरलालीलाब्जमाला भ्रमंकेशाग्र
प्रहितं त्वदीयचरणं रूपाब्जसेवारतं कारुण्यामृतसारपूरितदृशा मामद्य पश्येश्वरि
फु= मल्ली पुंन्नकुसुमोज्ज्वलमध्यभागधम्मिल्लभाराजितलतारकचित्रवस्त्रा उत्तंसहेमतिलक
शोभनलकायकांतिर्लक्ष्मीस्वयंप्रणमतोस्त्रियमातनोतु इति स्तुता महालक्ष्मीर्भक्ताना मि
ष्टदायिनी योगिनीभ्यः प्रविष्टाभ्यः प्रीतिता तासां वरं ददौ इच्छातास्तु मुदा देवीः सा रूपं च प्र
दापयेत् ताभिर्निर्भा विवितारेवी वरं स्वयं ददौ मुदा राजकन्यास्ततः सर्वा प्रक्ताः स्वपुरमा
ययुः ततः प्रभृति लोकेषु पूज्यास्ताः सर्वशो मुदा तास्मतः प्राष्ट योगिन्यो महालक्ष्मीपरि

स्तवीपितौ कृत्वानुस्थंडिलेपद्मसवर्तंगगक्रप्रजयेत् रषाद्यं [illegible] त्रतीनसैम माहितः
क्षीरोदार्णवसंभूतचंद्रलक्ष्मीसहोदर पीयूषधाम रोहिण्या सहितोर्घ्यं गृहाणवै क्षीरोदा
र्णवसंभूते कमले कमलालये प्रयच्छ सर्वकामान्मे विष्णुवक्षस्थलालये एवान्देहि यशो
रव्यासे देहि सौभाग्य [illegible] मेवच कालिकालि महाकालि विकरालि नमोस्तु ते त्रैलोक्यजननि
त्राहि वरदे भक्तवत्सले एकनाथे जगन्नाथे जगदानिश्रियेव्यये रेणुके त्राहि मां देवि राम
मातः शिवं कुरु कुरुश्रिय महालक्ष्मि अश्रियं त्वाशुनाशय मंत्रैरेतैर्महालक्ष्मीः प्रार्थ्याप्रोवि
ययोषितां श्रीसूक्तेन तथावह्नौ पद्मानि जुहुयाच्छुचिः पायसं चैव बिल्वानि तदलाभे त
थाघृतं गृहेभ्योपि होतव्यं समिद्घृततिलादिकं चंदनेतालपत्रं च पुष्पमाल्यादिकं त
था नवेद्यं यथाशक्ति वा बहुविधानि तु प्रत्येकं षोडशैतानि पूगपर्णानि चैव
हि तस्मिन्नसमाप्त्यार्थं त्रतीदद्यात्समंत्रकं क्षीरोदार्णवसंभूता लक्ष्मीश्चंद्रसहोदरा

न्या

णा सोहत्तोविधेद्दोरकं ज्वालामालाकुलेवं सो क्षिप्रवस्पतिकोपिता हाहाकष्टमिदंपापं
कृतंमूढतयात्वया इतिनिर्भर्त्सिताताभ्रांतमाजवनगह्वरे साचहानिययोपक्रान्तेचाहा
निनयन्नृपः मन्त्रिस्यापचारेणसारण्येजलवर्जिते भ्रममाणावनेतस्मिन्नकश्चिज्जं
तिर्मनुयात् विचरंतीवनेतत्रकरबैकस्यचिदाश्रमं ददर्शमृगसंकीर्णंशांतकुसुमसंगा
न्वितं तत्रापश्यद्वनेरम्ये वसिष्ठंमुनिपुंगवम् ववंदेचरणौतस्यापि संतादुःखकर्शिता
चिरंध्यात्वामुनिस्तस्याज्ञातवान्दुःखकारणं भर्तालस्यापचारेणज्ञातंविज्ञानचक्षुषा
तव्रतंकारयामासतस्यादुःखोपशांतये तद्दुःखंतत्क्षणादेवाविनष्टमभवत्तदा पुन
श्चमृगयासक्तोनृपालोवनमाविशत् कंचिन्मृगंसमाविध्यवाणेनैकेनवाहुमान्
मन्वगच्छन्मृगपदंतस्यामुनिसमागमः वरंमुनिंददर्शाग्रेवशिष्ठंवीतकल्मषं कु
तातिथ्यक्रियोहृष्टाचरंतीवहिरंतिकान् हावभावविभासाग्रे हरंतीहरिणेक्षणा मत्ता

४

ष्वि घनगह्वरे रम्यं सरोवरं दिव्यं कुमुदोत्पलमंडितं तत्रापश्यद्देव कन्यादिव्यरूपा मनो
रमाः चार्वंगाश्चारुनयना पीनोन्नतपयोधराः हारकंकणाकेयूरनूपुरालंकृताः सुभाः पत्न
नीः महालक्ष्मीव्रतं वेदेणसादरात् तव ज्ञकोपि पप्रच्छ किमिदं कथ्यतामिति स्त्रियऊचुः
महालक्ष्मीव्रतमिदं सर्वकामफलप्रदं क्रियतेस्माभिरेकाग्रमनोभिस्तत्रभक्तितः तव
ज्ञकोपि तच्छ्रुत्वा व्रतं जग्राह भक्तिमान् तदनुज्ञां गृहीत्वा स जलमादाय सत्वरः आजगाम
जलेतस्मै दत्वा प्रांजलिनासह जलं पीत्वा नृपस्सदृष्ट्वा दोरकं करे किमिदं दोरकं विद्व
न्‌ किं व्रतं कृतवानसि राज्ञा पृष्टस्तव ज्ञोपि कथयामास तद्व्रतं तच्छ्रुत्वा राजशार्दूलो व्रतं जग्रा
ह भक्तिमान् तस्चै केन सहितो राजा स्वपुरमाययौ पश्चाद्वनीगृहं गत्वालयारं तुंगतः सह
रममाणप्रसादेवीतेन राज्ञा प्रियेणवै तं दृष्ट्वा दोरकं हस्ते कुपितासेत कोपना कयात्वं
वंचितोद्य हकयाबद्धस्तु दोरकं मावादीरत्यथा चैव तत्लक्ष्मीव्रतमनुत्तमं रस्तुल्कात् प्रिये

१५६
मं. क
१

वाप्यं कुर्वतो व्रतमुत्तमम् अन्तकाले स्वयं विष्णुः संसारान्मोरिरक्षेति यइदं शृणुयान्नित्यं श्रावयेद्वा
समाहितः न संत्यजति तं लक्ष्मी गृहलक्ष्मीर्नैव काक्षयेत् सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते
यते इति स्कान्दोक्तं स्यंडिलक्ष्मीव्रतं ॥ युधिष्ठिर उवाच स्वस्थानलाभदं त्राणां सर्वैश्वर्यसुख
प्रदं व्रतमेकं समाचक्ष्व विचार्य पुरुषोत्तम श्रीकृष्ण उवाच दुर्वार वृत्रदैत्येन परित्यागे
त्रिविष्टपे एतदेव कृतस्पादो देवेन्द्रः प्राह नारदं तस्य श्रुत्वा ततो वाक्यं स मुनिः प्रत्यभाषत
नारद उवाच अयं देवराजः पूर्वं पुरमासीत्सुशोभनं रत्नगर्भा भुवद्भूमिर्यत्र रत्नाढ्यभूधराः यत्रां
गनाजनापाङ्गभङ्गलोचनसायकैः त्रैलोक्यं स्ववशं चक्रे देवः कुसुमसायकः चतुर्वर्ग
जनिर्यत्र पत्रचित्रविभूषणम् विश्वकर्मापि न द्वैरूप्यकं पश्यन्निशं शिरः यत्राभवन् १
महीपालो मङ्गलो मङ्गलालयः चिल्लदेवी प्रिया तस्य कुर्मगीकावभू वह अन्यातु चोलदे
वीपा महिषी सापरोस्विनी कदाचिन्मङ्गलो राजा चोलदेवी सहायवान् प्रासादशिखि
रारूढः स्थलेनैकमपश्यत नामानो कथमहीपालः स्मरस्मेरमुखं वृजा चोलदेवीं प्रति

उदिप्रारंभः

हीनावसाम्यहम् मुनीन्द्रस्याश्रमे रम्ये तरुगुल्मोपशोभिते ममोपरिकृपाविष्टो महालक्ष्मीव्र
तोत्तमं कारयामास विधिवत्सर्वविघ्नोपशांतये तयोक्तं वचनं श्रुत्वा सद्यो त्फुल्लविलोचनः
कुबेरनृत्तामादाय प्रियामादाय सत्वरः हृष्टपुष्टजनैर्जुष्टं पताकाध्वजशोभितं प्रविवेश
तया सार्द्धं स पौरैरभिवंदितः महालक्ष्म्या व्रतं भूयस्तया सह चकार ह भुक्तेह भोगान् वि
पुलान् पुत्रैः पौत्रैः समावृतः भूपालः सार्वभौमो भूत्तदन्तो मात्यत्तां ययौ महालक्ष्मीप्र
सादेन सन्निधिः सर्वसम्पदां एवंप्रभावा सा देवी नराणामिष्टदायिनी सर्वपापहरा दे
वी सर्वदुःखापहारिणी एवं षोडशवर्षं तु कर्त्तव्यं व्रतमुत्तमम् या करिष्यति तां भक्त्या स्व
यं सिद्धिमुपासते ते [illegible]न लालाश्च प्रयांति देशा इव मनोरथान् नारी वा पुरुषः करिष्यति
श्रद्धाभक्त्या व्रतं यत्नतः सर्वं ते हरिरुद्रपद्मजसुराः पुष्यंति तस्य प्रियं तत्पादोपरि रंजयं
ति मनुजा मोक्षिभ्रमा मरणे लेस्त स्मिन्नेव कुटुंविनीव सतिसालक्ष्मीः स्वयं विष्णुना मद्भक्त्या

श्र·र्दी·
१५१

राज्ञोंतिकमुपागतः निवेद्यतद्वृत्तं विप्रोराजानमप्यकारयत् नानाप्रकारसंभारसं
कुलं वटुकस्यच व्रतानुभावादभवत् सम्भ्रमउरूभ्रमत्तोवरः अथारूढ्यमहीपालोवटुप्र
यांणितेहयं तद्व्रतस्यप्रभावेन तूर्णं स्वपुरमागतः तमायांतं समालोक्य राज्ञानमं
पुरंदरं उत्सवंचक्रिरे पौरास्तौर्यत्रिकपुरःसरं चलत्पताकादोर्मालं लसत्कलसमौलि
कं पुरंनृत्यदिवाभातियत्तस्यां घोघर्घरैः अथोत्कालिकयाकाचिद्धावतिस्मवरांगना
चलन्मुक्तालतीजालैर्स्वलक्षामिव कुर्वती काचिद्विमुक्तकेशेवा वृतैकनयनांजनाका
चिन्नितंबभारार्ती काचिन्मीनपयोधरा अथाविशन्महीपालो वटुनासहितोगृहं पौर
नारीजनाक्षिमालाभिः पूरितविग्रहः अथोत्तीर्यहयात्तस्माद्वटवाहू वलोकितः जगाम
मंगलोराजाचोलदेवीगृहंतवै दृष्ट्वातंचोलदेवीसादोरकेराजवाहुके विस्मयमनसा
कुशांकांचक्रे नृपेत्विमं आविटकस्यव्याजेनगतोमेवल्लभांप्रति सौभाग्यायतथा

१५१

तैः ४२

षोडशपिंडांश्च गोधूमस्य द्विजातये दत्वा नक्तं संख्यया भुक्त्वा रात्रौ जागरणं व्रतेत् चंद्रो
दये च संजाते दद्यादर्घ्यं ततो व्रती मंत्रेणानेन विप्रेंद्र शंखेनाम्बुफलादिना नमोस्तु तेनि
शानाथ लक्ष्मीभ्रातर्नमोस्तु ते व्रतं संपूर्णतां यातु गृहाणार्घ्यं विधो मम इति चंद्रार्घ्यं प्रात
र्विसर्जयेद्देवीं मंत्रेणानेन सुव्रती पंकजे देवि संत्यज्य मम वेश्म निसंविश यथा सपुत्र
भस्तोहं सुखी स्यां त्वत्प्रसादतः इति विसर्जनं नम षोडशाहे तु संपूर्णे कुर्यादुद्यापनं व्रती वि
धिना येन विप्रेंद्र शृणु श्रद्धासमाहितः दातव्या धेनुरेका वै स्वर्णशृंग्यादिसंयुता श्रोत्रि
याय सुवर्णं च तथा वस्त्रवसनादिकं सर्प उवाच एतत्ते कथितं विप्र व्रतानामुत्तमं व्रतम्
यद्विधानादनायासाल्लभते वांछितं फलं कृत्वा व्रतं परं विप्र राज्ञानेते च कारय व्रतमे
तत्त्वया विप्र देयं श्रद्धावते परम् नास्तिकानां दुरात्मनां न प्रकाश्यं कथंचन नमस्कृत्वाथ
तं सार्पं पंकादुत्थाप्य वाजिनं संपीयां भस्तपारायपाश्चिनीय व्रजं व्रतं धात्तस्तु रंगं विप्रो
यथाशक्ति सुवर्णं च दत्वा पूर्णं भवेद्व्रतम् द्विजेभ्यः षोडशभ्यश्च प्रदद्याद्वसनादिकम् २०

[illegible]पद्मप्रियां मुक्तालंकारां [illegible] विश्वमूर्तिं [illegible] विश्वभर्तारं ऋद्धिसमृद्धिं तुष्टिं धनेश्वरीं
शुद्धं भोगिनीं भोगदात्रीं इति ध्यानं मार्तण्डमण्डलाखण्डचन्द्र[illegible]बिम्बाग्नितेजसां निधाने देवि दीपो
यं निर्मितस्तव भक्तितः इति दीपः। देवतालय पातालम् तन्नाधारधान्यजं षोडशाकारसं
भारं नैवेद्यं तेन नमः सदा नैवेद्यमन्त्रः स्नानादिकं विधायापि यतः शुद्धिरवाप्यते तदेतदाचम
नीयं महालक्ष्मि विधीयताम् इत्याचमनं पाताल तल संभूतं वदनाभोजनम् [illegible] नानागु
णसमाकीर्णं ताम्बूलं देवि तेन नमः ताम्बूलमन्त्रः तन्तुसंतानसंयुक्तं कलाकौशलनिर्मितं स
र्वाङ्गाभरणश्रेष्ठं वसनं परिधीयताम् वस्त्रमन्त्रः विष्णोर्वक्षसि या [illegible] शंखचक्रेण या वरे
लक्ष्मी देवी यथासि त्वं मयि निस्यात तथा भव इति प्रार्थना उत्तार्य दोरकं वाहोः लक्ष्मीयाश्चैव नि
वेदयेत् नक्षत्रे [illegible]हारालं दोरकं सम्यग्यामन्तं कथां श्रुत्वा सुवर्णं च दत्वा चार्याय दक्षिणां
एवं निर्वर्त्य विधिवत् पूजनं वदुकस्त्रियः चतुर्वर्णापि यदेया [illegible] शक्त्या वरदक्षिणा दीपा

ॐ श्रीं पद्मपुष्पामम[ध्ये]न्दीवरश्यामकरांबुजा अमितोगजयुग्मेन सिच्यमानांघ्रिपंकजा संवि
ध्येवंलिखेद्देवीं ॐ राज्यरूपंवरैः ततस्त्वावाहनं कुर्यात्मंत्रेणानेन सुव्रती महालक्ष्मी
समागच्छ पद्मनाभपदादिह पंचोपचारक्रमेयेत्वदर्थंशेविसंभृता स्त्यावाहने मैलय
ते हि कलितं कमलेकमलालये कमलेकमले सान्निध्यस्थितिंत्वं कृपयाकुरु स्थापनं
गंगादिसलिलाधारंतीर्थमंत्राभिमंत्रितं दूरयात्राश्रमहरं पाद्यंचप्रतिगृह्यताम् पाद्यं
स्नानेतवमयालक्ष्म्याकर्पूरागुरुवासितं सुतीर्थेभ्यःसमानीतं स्नानेनप्रतिगृह्यताम्
स्नानम् मलयाचलसंपन्नं नानायन्नगरक्षितं शीतलंबहुलामोदंचंदनंप्रतिगृह्यतां
चंदनं मिलत्सौरभमालामोदमत्तालिकुलसंकुलं आनंदनंदनोद्यानपद्मायैकुसुमंन द्या:
मः इति पुष्पं गंधसंभारसंलब्धं धूपवस्तुसमुद्भवम् सुरासुरैर्नहिदेविहाणमैस्त्रियम धूपं॥२४
प्रजापतिं लक्ष्मीवरदां विष्णुपत्नीं विष्णुवल्लभां हिरण्यवर्णां सुवर्णमालिनीं पद्मयोनीं दन

नर४ सि

श्र.कं.
१६.

याल्पर्थेलक्ष्मीसाप्यवमानिता ततःक्रुद्धामहालक्ष्मीश्चोलदेवीमभाषत शशापापमहालक्ष्मीश्चो
लदेवीपुनःपुनः कोलास्यामवद्दुष्टेत्वंराज्यभ्रष्टावनेगता कोलापुरमितिख्यातंस्थितौमंगलं न
पुरं अथायातामहालक्ष्मीश्चिलदेवीनिकेतने वद्दुधाचिलदेव्यासालक्ष्मीःसंमानितार्चिता
वृद्धारूपंपरित्यज्यत्रस्यक्ष्मासाभवत्तदा पंचोपचारपूजाभिःश्रियंराज्ञीततोर्चयत इतितुष्टात
तोलक्ष्मींचिलदेवीमुवाचह श्रीरुवाच अर्चनात्तेप्रसन्नास्मिचिलदेवेवरंवृणु वद्रवरंत
तोराज्ञीचिलदेवीशुभाशया येकरिष्यंतितेदेवि व्रतमेततुरेश्वरि तद्देशमनन्वयासाज्यंया
वचंद्रदिवाकरौ अथारभ्यकृपात्वेषाभूपसंवृधिनीतुया ख्यातिंयालक्षितौदविभक्तिर्भव
त्वमेत्वाय सद्भावेनकथामेतांयेश्रावतिपठंतिच तेषांतुवांछितंसर्वंत्वयादेयंसदेवहि
तथेत्युक्त्वामहालक्ष्मीस्तत्रैवांतरधीयत अथमंगलभूपालस्त्वागत्याश्रियोर्चनं वक्रेपर
मयाभक्त्याचिलदेव्यासमन्विता अथैर्ष्ययादुराचाराचिलदेवीगृहप्रति चोलदेवीसमा

१६.

वद्धो दोरकोऽमुं भुजेऽभुजे तथैव वटुकश्चायं दृष्ट्वा मां प्रेषितोऽद्भुतं ततोऽदुर्दैव वडुश्यामाको
पाराधिय दोरकं चिक्षेप च महीपृष्ठे स्वसौभाग्यसुखैः सह नबुबोध च तां राजा त्रोटयन्ती
च दोरकं सामंत मंत्रिभृत्याद्यैः कुर्वन्वार्तां विनोदवां चिल्लदेव्यास्तदा काचिद्दासी दृष्ट्वा समाग
ता तया दोरकमादाय वटुमापृष्ट्य तद्व्रतम् तद्व्रतस्य विधानार्थं स्वस्वामिन्यै निवेदितं
ततो नूतनमाहूय चिल्लदेव्यकरोद्व्रतं अथ संवत्सरे तीते लक्ष्मीपूजादिने नृप तौर्यत्रिकस्य
निस्वानं चिल्लदेव्या गृहे श्रृणोत् तदाकर्ण्य महीपालो नूतनं वटुमब्रवीत् अरे हृहायदिने ल
क्ष्म्यां सुव्रतस्यैक दोरकः इति दृष्टो नृपं प्राह दोरक त्रोटनक्रमं तच्छ्रुत्वा मंगलो राजा चोल दे
व्यै क्रुध्यच्च मया यत्पूजनं कार्यं चिल्लदेवी गृहं प्रति अथ मंगल भूपालो वटुं वाहूवल्लवित:
च चालकमलाचार्यो चिल्लदेवी गृहं प्रति अत्रांतरे महालक्ष्मीर्वृद्धारूपं विधाय च जिज्ञासा
र्थी गृहं तस्याश्चोलदेव्याः समागता गच्छ गच्छ पदुष्टे किं इहागत्य करोषि मे तया दुराश

व्र.कौ.
१६१

शक्रव्रतानां व्रतमुत्तमं यत्कथाश्रवणेनापि लभते वांछितं फलं प्रयागादिषु तीर्थेषु देवेषु भगवा
निव नदीषु च यथा गंगा व्रतेष्वेतत्तथा व्रतम् धर्मं चार्थं च कामं च मोक्षं च यदि वांछसि तदे
तच्च व्रतं शक्र कुरु श्रद्धासमन्वितः श्रीकृष्ण उवाच व्रतमिदमथ चक्रे नारदेनोपदिष्टं सुरप
तिरपि यस्माद्वांछितार्थं स लेभे त्वमपि कुरु तथैतद्धर्मसूनो यथास्माद् अभिमतफलसिद्धिं पु
त्रपौत्रादिवृद्धिः धनं धान्यं यशो धर्मं कान्तिमायुर्यशःश्रियं तुरंगान्रूपिणः पुत्रान्महतां लभेत्
अथ षष्ठमे इति श्रीभविष्योत्तरे महालक्ष्मीव्रतं अथ सर्वाल्लष्टम्यामाश्विनकृष्णाष्टम्यां वाशो
काष्टमीव्रतं हेमाद्रावादित्यपुराणे अष्टमीषु च सर्वासु पूजनीयाप्यशोकिका गंधमाल्यन
मस्कारधूपदीपान्नसंपदा तस्मिन्नहनि याम्भुक्ते नक्तं पिष्टुविवर्जितम् भवत्यथ विशोका सा
यत्र तत्राभिजायते अष्टमीषु च सर्वासु नचेच्छक्नोति वै मुने चैत्रे पक्षे सितायां या स्यात्कृष्णा ते
ष्टमी द्विज तत्र कार्यं व्रतं त्वेतत् सर्वकामफलप्रदम् इत्यशोकाष्टमीव्रतं इति श्रीभट्टनीलकं
ठात्मजभट्टशंकरकृतौ व्रतार्के अष्टमीव्रतानि ॥

व्र.कौ.
१६१

२ यातारूरस्येवीरितानने: ततोजगाममविपिनं यत्रासीदंगिरामुनिः अथालोक्याद्भुताकारां
ज्ञानदृष्ट्याविचिंत्यतां समुनिःश्रीव्रतंदिव्यंचोलदेवीमकारयत् व्रतेकृतेपसंज्ञातंचोल
देवीमहायशाः दक्षिणेकोलिलोलाभिर्लीवण्येकनिकेतनं ततःकदाचिदागत्यवनमा
खेटकेनृपः मुनेराश्रमनिराजातांददर्शवामलोचनां अथराजामुनिंप्राह केयंधन्यात
कथ्यतां तद्दत्तांतंसमाख्याय राज्ञेतांप्रददौमुनिः अथागत्यनिजंराज्यंचोलदेवीसमन्वि
तम् चित्रदेव्याचसहितो बुभुजेमंगलोनृपः समुद्रस्ययथागंगायमुनेसंगमेसदातथा
ने श्रीमंगलभूपस्य जातेवामलोचने परस्पराधिकेतेऽपिप्रियेराज्ञोबभूवतुः चित्रदेव्या
समंसोपिचोलदेव्यासहाविलो सप्तद्वीपवतींपृथ्वींबुभुजेमंगलोनृपः ततस्यास्येवसाम
र्थ्येहेतुकः सोपिनृ ततः अभूत्मंगलभूपस्यमंत्रीतवयथागुरुः भुक्त्वापसकलान्भोगा
न्मंगलोभूभुजांवरः सपुनःस्वर्गमेसामत्नतत्रैवविष्णुदेवतं नारदउवाच एतत्तेकथितं
चित्रदेवीवरंस्वव्रंचोलदेवीसमागमम् ४५.

प्रातर्दशम्यांकृत्वातुसंध्यायाःकालिकीक्रिया संपूज्यविधिवद्रामंभक्त्यावित्तानुसारतः
ब्राह्मणान्भोजयेद्भक्त्यादक्षिणाभिस्तुतोषयेत गोभूतिलहिरण्याद्यैर्वस्त्रालंकरणैस्तथा
रामंभक्तप्रयत्नेनप्रजयेत्परयामुदा एवंयःकुरुतेभक्त्याश्रीरामनवमीव्रतं अनेक
जन्मसिद्धानिपातकानिबहून्यपि भस्मीकृत्यव्रजेदेवतद्विष्णोःपरमंपदं सर्वेषाम
प्ययंधर्मोभुक्तिमुक्त्येकसाधनः अशुचिर्वापिपापिष्ठःकृत्वेदंव्रतमुत्तमम् पूज्यःस्यात्स
र्वभूतानांयथारामस्तथैवसः यस्तुरामनवम्यांतुभुंक्तेसचनराधमः कुंभीपाकेषुघो
रेषुपच्यतेनात्रसंशयः अकृत्वारामनवमीव्रतंसर्वव्रतोत्तमं व्रतान्यन्यानिकुरुतेनते
षांफलभाग्भवेत रहस्यकृतपापानिख्यातानितुबहून्यपि महांतिचप्रणश्यंतिश्रीरा
मनवमीव्रतात् एकामपिनरोभक्त्याश्रीरामनवमींमुने उपोष्यकृतकृत्यःस्यात्सर्वपा
पैःप्रमुच्यते नरोरामनवम्यांतुश्रीरामप्रतिमाप्रदः विधानेनमुनिश्रेष्ठसमुक्तोना

अथ नवमीव्रतानि तत्र शुक्लनवम्यां रामनवमीव्रतं तच्च पराविद्धायां मध्याह्नव्यापिन्यां का
र्यं तदुक्तमगस्त्यसंहितायां चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि सैव मध्याह्नयोगेन महा
पुण्यतमा भवेत् दिनद्वयेऽप्युक्तव्याप्तावव्याप्तावेकदेशव्याप्तौ वा उत्तरा तदुक्तं नैव नव
मी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै दशम्यां पारणं भवेदिति तत्रैव चै
त्रमासे नवम्यां तु जातो रामः स्वयं हरिः पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा श्रीरामनव
मी प्रोक्ता कोटिसूर्यग्रहाधिका केवलापि सदोपोष्या नवमीशाह्नसंग्रहात् तस्मात्सर्वात्मना सर्वैः
कार्यं वै नवमीव्रतं अगस्त्यसंहितायां चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ उदये गुरु
गौरांशे स्वोच्चस्थे ग्रहपंचके मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये आविरासीत्सकलया
कौशल्यायां परः पुमान् प्राक्पक्षे शुक्लपक्षे उदये गुरुगौरांशे गुरुनवांशे तस्मिन् दिने तु
कर्तव्यमुपवासव्रतं सदा तत्र जागरणं कुर्याद्रघुनाथपरो भुवि भवीतिरवह्लादिमाधवसर्वे

अर्चितः कृतार्चनः ×२

अथ एवं सामकव्यादिव्यामहः पूर्वं नयेत् ततो सायं संध्यादिकाः कुर्यात् क्रियाः राममनुस्मरन् आचार्यसहितो रात्रौ

अ.सं.
१६३

क्रियाम् आचार्यमेवं जयेत् सम्यक् तस्मात् सात्विकान्नैः सुविस्तरम् भुञ्जीयात् स्वयमप्येवं रामे हृदि मनः
स्मरन् एकभक्तव्रती तत्र सहाचार्यो जितेन्द्रियः शयीत भूतले सम्यक् श्रीरामार्पितमानसः
ततः प्रातः समुत्थाय स्नात्वा संध्यां यथाविधि प्रातः सर्वाणि कर्माणि शीघ्रमेव समापयेत्
ततः स्वस्थमना भूत्वा विद्वद्भिः सहितोऽनघ स्वगृहे चोत्तरे भागे मण्डपं द्वयमुज्वले मण्डपे च
चतुर्द्वारं ध्वजाकारयोग्यविस्तारैः फलैर्नानाविधैर्युक्तं पुष्पमालाभिशोभनं कदलीस्तं-
भसंयुक्तं क्रमुकयोर्वरैर्युक्तताम् सतोरणमनोरम्यं पुष्पौघैः समलंकृते शंखचक्रकृतैर्न-
भाङ्गैः प्राग्द्वारे समलंकृतं गरुत्मच्छार्ङ्गबालैश्च दक्षिणे तु च भूषितां गदाखेटकारवज्रा-
दिपश्चिमेन विभूषितं पद्मस्वस्तिकनीलैश्च कौबेर्यां समलंकृतं मध्ये हस्तचतुष्कायेवे-
दिकां हस्तमायतं विशेषगीतनृत्यैश्च वाद्यैश्चापि समन्वितम् पुण्याहं वाचयेत् तत्र विद्वद्भिः प्री-
तमानसः ततः संकल्पयेद्देवं राममेवमनुस्मरन् अस्यां रामनवम्यां तु रामाराधनतत्परः

वधः शायी
जितेन्द्रियः व
सत्स्वयं नैवे
कांते×२
रामस्तोत्रम
मंडपं=४
युक्तं=
स्तं=
१६३

स्वगृहे स्वगृहमध्ये
×७×

त्रसंशयः। विधानेन प्रतिमादानविधिना सुतीक्ष्ण उवाच श्रीरामप्रतिमादाने विधानं वाक्
यं मुने कथयत्वपि रामेपि भक्त्या समविस्तरात् अगस्त्य उवाच कथयिष्यामि तद्दिव्य
प्रतिमादानमुत्तमं विधानं वापि यत्नेन यत्कृतं वैष्णवोत्तमः विधिमूतत्रैव अष्टम्यां चैत्र
मासे तु शुक्लपक्षे जितेंद्रियः दंतधावनपूर्वं तु प्रातः स्नायाद्यथाविधि नद्यां तडागे कूपे
वा कूदे प्रस्रवणेपि वा ततः संध्यादिकाः कार्याः संस्मरन् राघवं हृदि गृहमासाद्य विप्रेंद्र
कुर्याद्दोपासनादिकं दांतं कुटुंबिनं विप्रं वेदशास्त्रविदं सदा श्रीरामपूजानिरतं सुशीलं
दंभवर्जितं वि[?]ं तं राममंत्राणां राममंत्रैकसाधनम् आहूय भक्त्या संपूज्य संशृणुयात्
प्रार्थयेद्व्रतम् श्रीरामप्रतिमादानं करिष्येहं द्विजोत्तम तत्राचार्यो भव प्रीतः श्रीरामोसि
त्वमेव च इत्युक्त्वा पू[?]यि[?]विप्रं तं स्नापयित्वा ततः स्वयं तैलेनाभ्यक्तस्नात्वा र्यश्चिंतयन् रा
तैलेनाभ्य घवं हृदि श्वेतांवरधरः तगंधमाल्यानि धारयन् अर्चितो भूषितश्चैव कृत्वा मध्याह्नकी
अपस्नापयित्वेत्यन्वयः ४२ धि४४ ह्वे४२

उपोष्याष्टम्यामेवं संपूजयित्वा यथाविधि इमां स्वर्णमयीं रामप्रतिमां तु प्रयत्नतः श्रीरामप्रीत
येदास्ये रामभक्ताय धीमते श्रीरामो मे हरत्वाशु पापानि सुबहूनि मे अनेकजन्मलग्नानि अ
भ्यस्तानि महान्ति च विलिखेत्सर्वतोभद्रं वेदिकोपरि सुंदरं मध्ये तीर्थोदकैः पूर्णं पात्रं संस्था
प्य चर्चिते सौवर्णे राजते ताम्रे पात्रे षट्कोणमालिखेत् ततः स्वर्णमयीं रामप्रतिमां पल
मानतः निर्मितां द्विभुजां रम्यां वामांकस्थितजानकीं बिभ्रतीं दक्षिणे हस्ते ज्ञानमुद्रां महामुने
क वामेनाधःकरेणैव देवींमालिंग्य संस्थितां सिंहासने राजते च पलद्वयविनिर्मिते पंचामृतस्ना
नपूर्वं संपूज्य विधिवत्ततः मूलमंत्रेण नियतो दद्याद्वै वसनं द्विजः एवं संपूज्य विधिवद्रा
त्रौ जागरणं तथा दिव्यां रामकथां श्रुत्वा रामभक्तिसमन्वितः नृत्यगीतादिभिश्चैव रामस्तोत्रैर
नेकधा एवमष्टकेन संपूज्य गंधपुष्पाक्षतादिभिः कर्पूरागुरुकस्तूरीकह्लारैरलंकृताम्
संपूज्य विधिवद्भक्त्या दिवा रात्रौ नयेद्बुधः ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः सं

श्रीरामरामरामेतिएतत्तारकमुच्यते अतस्त्वं जानकीनाथ परं ब्रह्माभिधीयते इति तारकं ब्रह्म
चेत्युक्तं तेन प्रजाप्रशस्यते श्रीअंगदेवतानां तथा वस्त्रीनां तथैव च आदावेव कुर्वीत देवस्य
प्रीतमानसः उपचारैः षोडशभिः पूजा कार्या यथाविधि आवाहनं स्थापनं च सन्मुखीकरणं
तथा एवं मुद्राप्रार्थनाच पूजा मुद्राश्च यत्नतः शंखपूजां च कुर्वीत पूर्वोक्तविधिना ततः
कलशं वामभागे च पूजाद्रव्याणि चादरात् श्रीअंगसंभ्रमयत्नेन आत्मानं मंत्रमुच्चरेत् पाद्यासा
दनमप्येवं कुर्यात् यथा मेघूतंडिलः श्रीतो वराणि देवाय प्रार्थयन्नर्पयेत्सुधीः स्वर्णयज्ञोप
वीतानि दर्पणादेवाय भक्तितः नानारत्नविचित्राणि रम्याण्याभरणानि च हरिमांवुघष्टहृचि
रघनसारसमन्वितम् कंमात्मूलमंत्रेण उपचारान्प्रकल्पयेत् कल्हारैः केतकैर्जातीभिः
पुन्नागाद्यैश्च पूजयेत् चंपकैः शतपत्रैश्च सुगंधैश्च मनोहरैः धूपचंदनधूपैश्च ततस्तं
चैश्च पूजयेत् भक्ष्यभोज्यादिकं भक्त्या देवाय विधिनार्पयेत् येन संतोषयत्कर्तं देवं दत्वा पापैः

अगस्त्य उवाच रहस्यं महाभाग स्वस्वविज्ञानुसारतः पलार्द्धेन तदर्धेन तदर्धार्द्धेन वापु
नः वित्तशाठ्यमकृत्वैव कुर्याद्देवं व्रतं मुने यदि घोरतरं दुःखं पातकं नेहतं किंचित श्रीकि
चनोपि यत्नेन उपोष्य नवमीदिने एकवित्तोपि विधिवत्सर्वपापैः प्रमुच्यते प्रातःस्नाना
चमनीयं कृत्वा संध्यादिकां क्रियाः गोभूतिलहिरण्यादि दद्याद्वित्तानुसारतः श्रीरामचंद्रभक्ते
भ्यो विशुद्धैः श्रद्धयान्वितः पारणं तु प्रकुर्वीत ब्राह्मणैः स्वस्वशाखिलैः एवं यः कुरुते भक्त्या सर्व
पापैः प्रमुच्यते आगते श्रीरामनवमीदिने मर्त्यो विमूढधीः उपोषणं न कुरुते कुंभीपाकेषु प
च्यते यत्किंचिद्राममुद्दिश्य क्रियते नत्वशक्तितः रौरवे स तु मूढात्मा पच्यते नात्र संशयः
सुतीक्ष्ण उवाच यामाष्टकेषु पूजा वै तत्र नोक्ता महामुने मूलमंत्रेण संयुक्तं तत्कथं वद सुव्रत
अगस्त्य उवाच सर्वेषां राममंत्राणां मंत्रराजः षडक्षरः स्कांदे मोक्षखंडे श्री[illegible]रुद्रगीतायां
रुद्रवाक्यं ४ मुमूर्षोर्मणिकर्ण्यां तु अर्द्धोदकनिवासिनः अहं दिशामि ते मंत्रं तारकं स्योपदेशतः

अथाश्विनशुक्लनवम्यां देवीपूजा हेमाद्रौ विष्णुधर्मे रामः ... विधिना पूजयेत्केन भद्रकालीं नरा
धिप नवम्यामाश्विने मासि शुक्लपक्षे नरोत्तम पुष्कर उवाच पूर्वोत्तरे तु दिग्भागे शिवे वास्तु म
नोहरे भद्रकाल्या गृहं कुर्याच्चित्रवस्त्रैः स्वलंकृतं भद्रकालीपटं कृत्वा तत्र संपूजयेद्द्विज पटं
स्वरूपं सा चोक्ता तत्रैव अष्टादशभुजा कार्या भद्रकाली मनोहरा आलीढस्थानसंस्थाना चतुः
सिंहरथोपरि अक्षमालां त्रिशूलं च खड्गं चर्म च ... बाणं चापं च कर्त्तव्यं शंखं पद्मं तथैव
च। स्रुक्स्रुवौ च तथा कार्यौ तथा वैदिकमण्डलं दण्डं शक्तिं च कर्त्तव्ये तथा शक्तिं हुताश
नो हस्तानां भद्रकाल्यास्तु भवेत् कान्तिकरः करः एकैकेव महाभाग रत्नपात्रधरो भवेदिति आ
श्विने शुक्लपक्षस्य अष्टम्यां प्रयतः शुचिः तत्रैवायुधचर्माणि ध्वजं छत्रं वस्त्रं च पूजयेत् पुष्पैर्गन्धैः
फलैर्भक्ष्यैर्भोज्यैश्च सुमनोहरैः बलिभिश्च विचित्रैश्च प्रेक्षादानैस्तथैव च रात्रौ जागर
णं कुर्यात्तत्रैव वसुधाधिपः उपोषितो द्वितीयेऽह्नि पूजयेत्तु नरेश्वर तां आयुधाद्यं च सकलं

प्रमुच्यते जन्मकोटिकृतैर्घोरैर्नानारूपैश्च दारुणैः विपुलस्वर्णताम्रादेवरामएवमवेन्मुने
श्रद्धधानस्सदातस्मैश्रीरामनवमीव्रतम् सर्वलोकहितार्थंचपवित्रंपापनाशनम् लोहेन
निर्मितंवापिशिलयादारुणापिवा एकेनैवप्रकारेणयस्मैकस्मैयथामुने कृतंसर्वंप्रय
त्नेनयत्किंचिदपिभक्तितः जपेदेकांतवासीनोयावत्स्यादशमीदिने ब्रतेनस्नात्वापुनःप्रातर्द
शम्यांभोजयेद्द्विजान् भक्ष्याभोज्यैर्बहुविधैर्दद्यात्पायसदक्षिणां कृतकृत्योभवेत्तेनसद्यो
रामंप्रसीदति तस्मात्तिष्ठन्नरोयातिपुनरावृत्तिवर्जितः द्वादशाब्दकृतेनापियत्पापेनापिमुच्य
ते विलयंयातितत्सर्वंश्रीरामनवमीदिने जपंचराममंत्रस्ययोनजानातितस्यवै उपोष्यसं
श्लो ४ स्मरन्रामंन्यासपूर्वंमनन्यधीःगुरुतं [illegible] पमंत्रलुन्यसेन्न्यासपुरःसरः यामेयामेचविधिना
कुर्यात्स्वज्ञोविधानतः मुमुक्षुरपिसदाकुर्यात्श्रीरामनवमीव्रतम् नसमं [एवं] तेनराश्रेष्ठाः देवा
श्चापिविशेषतः तस्मात्सर्वात्मनासर्वैःकर्तव्यंनवमीव्रतं मुच्यतेसर्वपापेभ्योयातिब्रह्मसनातनं
इतिश्रीस्कंधपुराणेअगस्त्यसंहितायांअगस्त्यसुतीक्ष्णसंवादेरामनवमीव्रतंसंपूर्णम् ॥ ॥

अत्रत्रुटिः
पत्रद्वयम् ४१

दो×२

व्र.कं.
१६७

येत्सुरसत्तम तस्मिन्देवीप्रकर्तव्या हैमी वा राजती तथा मृन्मयी लक्षणोपेता खड्गशूले च
पूजयेत् सर्वोपहारसंपन्नवस्त्ररत्नफलादिभिः कारयेद्रथ्यलादिपूजां च वलिदेविकी
वलिग्राहिणो देवा विनायकादयः ततस्तं विधिना वलिदेविकीपुष्पैः द्रोणविल्वाम्रजा
तीपुन्नागपैचंपकैः द्रोणः कुरुवकः विचित्रा रचयेत्पूजां अष्टम्यामुपवासयेत् दुर्गाग्र
तो जपेन्मंत्रमेकचित्तः समाहितः तदर्द्धयामिनीशेषे विजयार्थं नृपोत्तमः पंचाब्दं लक्ष
णोपेतं महिषं वा छागं सुपूजितम् विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत् तस्योत्थं रु
धिरं मांसं गृहीत्वा पूजनादिभिः निर्ऋतायप्रदातव्यं महाकौशिकमंत्रितम् तस्याग्रतो नृ
कृ= पः स्नायाच्छत्रं कृत्वा तु पिष्टजं खड्गेन घातयित्वा तु दद्यात्स्कंदविशाखयोः ततो देवी
पुनः प्रातः क्षीरसर्पिर्जलादिभिः कुंकुमागरुकर्पूरैश्चंदनैश्चापि धूपयेत् हेमादिपुष्प १६७
रत्नानि वासांसि महतानि च नैवेद्यं सुप्रभूतं तु देयं देव्याः समाहितैः देवीभक्तान्पूजयी
तं

पूजयेद्वसुधाधिप एवं संपूजयेद्देवीं वरदां भक्तवत्सलां कात्यायनीं कामगमां बहुरूपां व
रप्रदां पूजिता सर्वकामैः सा पुनक्ति वसुधाधिप एवं हि संपूज्य जगत्प्रधानां यथानुरू
पां वसुधाधिपेन प्राप्नोति सिद्धिं परमां महे पूजनस्तथान्योपि च वित्तशक्त्या देवीपुराणे
ब्रह्मोवाच शृणु शक्र प्रवक्ष्यामि यथा त्वं परिपृच्छसि महासिद्धिप्रदं धन्यं सर्वशत्रुनिवर्ह
णं सर्वलोकोपकारार्थं विशेषाद्दस्युवृत्तिषु कृतवर्थे ब्राह्मणे वैश्ये क्षत्रिये भूमिपालने
गोधनार्थे विशेषेण समृद्धये पुत्रसुखार्थिभिः सौभाग्यार्थं स्त्रिया कार्यं मन्येश्वर्यधनकांक्षिभिः
महाव्रतं महापुण्यं शंकराद्यैरनुष्ठितं कर्त्तव्यं देवराजेन्द्र देवीभक्तसमन्वितैः कन्यासंस्थे
रवौ शक्र शुक्लामारभ्य नन्दिकां नन्दिका प्रतिपत् अयाचितपर्वैकाशी नक्ताशी त्वपर्वो ८: पु
पुनरप्येवं प्रातःस्नायी जितद्वन्द्वः त्रिकालं शिवपूजकः शिवस्वाशिवाचार्यैर्वा जपहोमसदास
क्तः कन्यका भोजयेत्तद्वा अष्टम्यां नवमे हानि दारुणानि शुभानि च एकं वा वित्तभावेन कार

घ्यांतसहिताःसर्वेचंद्रवत्यांमहाबलाः रस्तुकामाप्रययुःसर्वेपुरस्कृत्यहरिंसुराः दृष्ट्वादेवैस्तु
देवेशोगर्जमानस्तुदानवः असंख्यातसहस्रैस्तुदिव्यप्रहरणायुधैः हन्यमानास्तदादेवा
असुरैर्बाहुशालिभिः तेसंग्रामंसमुत्सृज्यपलायंतदिशोदश ततोदृष्ट्वाहृषीकेशःसंग्रामे
समुपस्थिते अन्वधावन्नभिक्रुद्धाविविधायुधपाणयः अथतान्सद्गतान्दृष्ट्वा शंखच
क्रगदाधरः चिक्षेपसर्वगात्रेषुशरैराशीविषोपमैः तेनाछिन्नास्तुशतशोदानवानि
धनंगताः एकोगेदानवःस्थित्वायुध्यमानोमुहुर्मुहुः तस्योपरिहृषीकेशोयपद्दायु
धमुत्सृजेत् पुष्पवत्तंसमभ्येतिकुर्वितंतस्यतेजसा शस्त्रास्त्रैर्वध्यमानोपियदाजेतुंनश
क्यते युयोधचतदाक्रुद्धोबाहुभिःपरिघोपमैः बाहुयुद्धंकृतंतेनदेवेशेःवर्षसहस्रकं
तेनश्रांतःसभगवान्गतोवदरिकाश्रमं तत्रवाहिवतीनामगुहापरमशोभना तांप्र
विश्यमहायोगीसुष्वापजगतांपतिः योजनद्वादशायामाएकद्वाराधनंजय

न

ग=२

वत्सल त्राहित्राहि महायोगिन् भीतानांशरणंभव दानवैर्निर्जितादेवाः स्वर्गभ्रष्टाः
कृताविभो स्वर्गभ्रष्टाजगन्नाथविचरंतिमहीतले इंद्रस्यवचनंश्रुत्वाविष्णुर्वचनमब्र
वीत् कोसौदैत्योमहामायोदेवाजैनाविनिर्जिताः किंस्थानंतस्यकिंवासंकिंवलंकुत्र
राश्रयः एतत्सर्वंमयावक्तव्यंमघवन्नतिनिर्भयोभव इंद्रउवाच भगवन्देवदेवेशभक्ता
नाडी= नुग्रहकारक दैत्यःपूर्वंमहानासीत्ताङजंघइतिस्मृतः ब्रह्मवंशसमुद्भूतोमहोग्रःसु
रसूदनः तस्यपुत्रोतिविख्यातःमुरनामामहासुरः तस्यचंद्रवतीनामनगरीचगरीय
सी तस्यांवसन्सदुष्टात्माविश्वंनिर्जित्यवीर्यवान् सुरान्स्ववशमानीयनिराकृत्यत्रि
विष्टपात् इंद्राग्नियमवाय्वीशसोमनिर्ऋतिपाशिनां पदेषुस्वयमेवासीत्सूर्योभूत्वा
तपत्यपि पर्जन्यःस्वयमेवासीदजेयःसर्वदैवतैः जहितंदानवंविष्णोःसुराणांजयमाव
ह तस्यतद्वचनंश्रुत्वाकोपाविष्टोजनार्दनः उवाचशक्रंदेवेंद्रहनिष्येतंमहाबलम्

दु.र्व.
रुद्र.
२००

स्थितां वापिकृतांजलिपुटां नतां विस्मयोत्फुल्लनयनः प्रोवाच जगतां पतिः केनायं निह
तः संख्ये दानवो दुष्टमानसः येन देवाः सगंधर्वाः सिद्धाः सहमरुद्गणाः सनागाः स
हलोकेशा लोकपालाश्च विनिर्जिताः येनाहं निर्जितो भीतः श्रांतः सुप्तो गुहामिमां केन का
रुण्यभावेन रक्षितो हं पलायितः मया विनिहतो देवेशत्वं गोप्यतया प्रभो दृष्ट्वा सु
प्तं हरे त्वां हि देवो हं तं समुद्यतः त्रैलोक्यकंटकस्यास्य व्यवसायं प्रबुध्य च हतो मया
दुरात्मासौ देवता निर्भयाः कृताः तवैवाहं महाशक्तिः सर्वशत्रुक्षयंकरी त्रैलोक्यरक्ष
णार्थाय हतो लोकभयंकरः निहतं दानवं दृष्ट्वा किमाश्चर्यं वद प्रभो श्रीभगवानुवाच
निहते दानवे दुष्टे स्मिन्संतुष्टो हं तवानघे हृष्टपुष्टाश्च वै देवाश्चानंदाः समजायत आ
नंदस्त्रिषु लोकेषु मुनीनामपि यत्कृतः प्रसन्नोस्म्यनघे तुभ्यं वरं वरय सुव्रते ददामि ते
न संदेहो यः सुरैरपि दुर्लभः एकादश्युवाच यदि तुष्टोसि मे देव यदि देयो वरो मम

रुद्र.
२००

अहं तत्र प्रसूतोस्मि पुरा भीतो न संशयः महाक्रुद्धेन तेनैव ग्रस्तोहं पातुमेव न दानवः ९१
ततो लग्नः प्रविवेश सत्ताग्रहं प्रसुप्तं मां तदा दृष्ट्वा चिंतयद्दानवो हृदि हरिमेनं हनिष्यामि
दानवानां स्वयाव्हं एवं संस्तुमे तेनस्य अवसाये अवस्यच समुद्भूताम मां गेभ्यः कन्यकै
का महाप्रभा दिव्यप्रहरणा देवी युद्धाय समुपस्थिता ईक्षिता दानवेंद्रेण मुरेण पांडु
वर्षेण युद्धसमीहितं तेनाक्षिया तत्र प्रयाचितम् सा कन्या युयुधे तेन निःसंतोहं दृष्ट्वा विस्मयं
गतः केनेयं निर्मिता रौद्रा अस्त्रशस्त्राणि पातिनी इत्युक्त्वा दानवेंद्रोसौ युयुधे कन्यया तया
ततस्तया महादेव्या त्वरया दानवो बली छित्वा सर्वाणि शस्त्राणि क्षणेन विरथः कृतः
बाहुप्रहरणोपेतो धावमानो महाबलात् तलेनाहत्य हृदये तया देव्या निपातितः
ततस्तं ज्ञातयो ये ये प्रसूयो युद्धमूर्द्धनि तद्गणाः कृतशिरसो जग्मुर्वैवस्वतक्षयं शेषा भ
यार्द्दिता दीनाः पाताले विविशुर्द्विषः ततः समुत्थितो देवः पुरो दृष्ट्वा दनुं मुरं कन्यां पुरः

ति×४

६

प्र.कौ.
~~१९९~~
२०१

हष्टान्तसंजातातत्रैवैकादशीतिथिः इमामेकादशींयाश्चकरिष्यंतिनरालये शङ्खंसोवो
हरिष्यामिदास्यामिपरमांगतिं येपिवैकरिष्यंति एकादश्यांमहाव्रतम् हरामिते
षांविघ्नानिसर्वेसिद्धिंददामिच एवमुक्त्वासमस्तत्तिमेकादश्याः तथास्तु इयमेकाद
शीनित्यासर्वपापक्षयंकरी एकेव चमहापुण्यासर्वपापानिहारिणी पूजितासर्वलो
केषुसर्वसिद्धिकरातिथिः शुक्लावाप्यथवाकृष्णा इतिभेदंनकारयेत् कर्त्तव्येतेउमे
पार्थनतुल्याद्वादशीतिथिः अंतरंनैवकर्त्तव्यंसमस्तैर्व्रतकारिभिः तिथिरेकाभवेत्स
र्वपक्षयोरुभयोरपि एकादशीतुसंपूर्णाप्रभातेघटिकायदि सातिथिःपरिहर्त्तव्या
उपोष्याद्वादशीतदा एवंविधामयाप्रोक्तापक्षयोरुभयोरपि उपवासंप्रकुर्वंति ए
कादश्यांनराश्चये तेयांतिपरमंस्थानंयत्रास्तेगरुडध्वजः धन्यास्तेमानवालोके
विष्णुव्रतपरायणाः ~~इत [illegible] विष्णुलोकेमहीयते~~ एकादश्याश्चमाहा

~~१९९~~
२०१

याचेहं वरं दातव्यं नः प्रसन्नो वरदर्षभ उपवासस्य यत्पुण्यं तस्यां दिने नक्तभोजने तदर्द्धं च
भवेत्तस्य एकभक्तं करोति यः यः करोति व्रतं भक्त्या दिने मम यतेंद्रियः स गत्वा वै
ष्णवं स्थानं कल्पकोटिशतानि तु भुंजानो विविधान्भोगानुपवासं करोति यः भग
वन्त्वत्प्रसादेन भवत्वेवं वरो मम उपवासश्च नक्तं च एकभक्तं करोति यः तस्य ध
र्मं च वित्तं च मोक्षं देहि जनार्दन श्रीभगवानुवाच यत्त्वं वदसि कल्याणि तत्सर्वं च भ
विष्यति मम भक्ताश्च ये लोके तव भक्ताश्च ये नराः त्रिषु लोकेषु विख्याताः प्राप्स्यति म
म सन्निधिं सर्वासां च तिथीनां त्वमुत्तमापि भविष्यसि उपोष्यैकादशीं यो वै मम पूजां
करिष्यति दग्ध्वा पापानि वासत्वं दास्यामि पदमव्ययं तृतीया चाष्टमी चैव नवमी च च
तुर्दशी एकादशी विशेषेण तिथयो मे मताः प्रियाः सर्वतीर्थाधिकं पुण्यं सर्वदानाधिकं
परं सर्वव्रताधिकं चैव सत्यं सत्यं वदामि ते एवं दत्वा वरं तस्मात्तत्रैवांतरधीयत ततो
एकादश्यां सुव्रतं नाम महापापैः प्रमुच्यते व्रत एकादशी त्वेवं तव नाम भविष्यति ४

नः व्यासस्य वचनं श्रुत्वा कंपितो श्वत्थपत्रवत् भीमसेनो महाबाहुर्भीतो वाक्यमभाषत भीम
सेन उवाच पितामह न शक्तोहं नृप वा से करोमि किं अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो
व्यास उवाच वृषस्थे मिथुनस्थे वा शुक्ला ह्येकादशी भवेत् ज्येष्ठमासे प्रयत्नेन सोपोष्यात
जलवर्जिता स्नाने वा चमने चैव वर्जयित्वोदकं बुधः उपभुंजीत नैवान्यद्व्रतभंगोन्यथा
भवेत् उदयादुदयं यावद्वर्जयित्वोदकं बुधः अप्रयत्नादवाप्नोति द्वादश द्वादशीनृप
ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् जलं सुवर्णं दत्वा च द्विजातिभ्यो यथाविधि
भुंजीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत् सं
वत्सरस्य या मध्ये एकादश्यो भवंत्युत तासां फलमवाप्नोति अत्र मे नास्ति संशयः इति
मां केशवः प्राह शंखचक्रगदाधरः तस्य व्रतस्य यत्पुण्यं तन्मे प्राह जनार्द्दनः एकादश्यां
सितेपदे ज्येष्ठस्योदकवर्जितम् उपोष्य फलमाप्नोति तच्छृणुष्व वृकोदर सर्वतीर्थे

त्म्यं सर्वकालेतु यः पठेत् अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः यः शृणोति दिवा रात्रौ न
रो विष्णुपरायणः कुलकोटिसमायुक्तो विष्णुलोके महीयते एकादश्याश्च माहात्म्यं पा
द्मेकं शृणोति यः ब्रह्महत्यादिकं पापं नश्यते नात्र संशयः विष्णुधर्मसमं नांगीतार्थ
स्य धनंजय एकादशीसमं नास्ति व्रतं नाम सनातनमिति मात्स्ये एकादशीव्रतक
था ज्येष्ठशुक्लैकादश्यां निर्जलैकादशीव्रतं तद्विधिः स्कांदे ज्येष्ठे मासि नृपश्रेष्ठ
या शुक्लैकादशी भवेत् निर्जलं समुपोष्यात्र जलकुंभान्सशर्करान् प्रदाय विप्रमु
ख्येभ्यो मोदते विष्णुसन्निधाविति अथ कथा पाद्मभारतयोः युधिष्ठिर उवाच श्रु
ता मे मानवा धर्मा वैदिकाश्च श्रुतास्तथा कलौ युगे न शक्यंते ते वै कर्तुं नराधिप सु
खोपायमल्पधनमल्पक्लेशं महाफलम् पुराणानां च सर्वेषां सारभूतं त्वदामिते
एकादश्यां न भुंजीत पक्षयोरुभयोरपीति एकादश्यां न भुंक्ते यो न याति नरकं तु
मयाश्रुता द्वैपायनयोदिष्टं वैसर्वान्वक्तुमर्हसि मासत्रवा

ब्रह्मपुराणे एकादश्यां तु शुक्लायां मासाषाढे भगवान्हरिः भुजंगशयने शेते यदा क्षीरा
र्णवे सदा तदा तत्प्रतिमां कार्या सर्वलक्षणसंयुता सुप्ता तु शेषपर्यंके शैलमृद्भिस्तु
दारुभिः ताम्रारकूटरजतैस्तथा चित्रपटेषु वा लक्ष्म्युत्संगहस्तेच विन्यस्तचरणा
म्बुजं उत्संगहस्ते उत्संगस्थितेहस्ते नानाविधोपकरणैः पूज्याचविधिपूर्वकम् उप
वासश्चकर्त्तव्यो रात्रौ जागरणं तथा तस्यां रात्र्यां व्यतीतायां द्वादश्यां पूजयेत्तथा त्रयो
दश्यां ततो गीतं नृत्यं वाद्यं निवेदयेदिति भविष्योत्तरे आषाढस्य सिते पक्षे एकादश्या
मुपोषितः स्थापयेत्प्रतिमां विष्णोः शंखचक्रगदाधरां कांचनीं राजतीं ताम्रमयीं पै
त्तलकीं तथा पीतांवरधरां सौम्यां पर्यंके स्वास्तृते शुभे शुक्लवस्त्रसमाछन्ने सोप
धाने युधिष्ठिर इतिहासपुराणज्ञो विष्णुभक्तोथवाऽमान् स्नापयित्वा दधिक्षी
रघृतक्षौद्रजलैस्तथा नानामलम्पष्ठभैः गंधैर्धूपैर्दीपैरलंकृतम् पूजयेत्कुसुमैः

पुण्यात्पुण्यं सर्वतीर्थेषु यत्फलम् सर्वं हि से पुण्यात्पुण्यं तदस्याः समुपोषणात् संवत्सरे च
याश्चस्युः शुक्लाः कृष्णाश्च कोदर उपोषितास्तु सर्वाः सुरैकादश्येन संशयः धनधान्यवहाः
पुण्याः पुत्रारोग्यप्रदास्तथा उपोषिता नरव्याघ्र इति सत्यं ब्रवीमि ते यमदूता महाका-
याः करालाः कृष्णरूपिणः दंडपाशधरा रौद्रा मरणे हृष्टिगोचराः नदृश्यंति नरव्याघ्र
एकादश्याः समुपोषणात् पीतांबरधराः सौम्याश्चक्रहस्ता मनोजवाः अंतकाले नयं
त्येनं वैष्णवं वैष्णवीं पुरीम् तस्मात्सर्वप्रयत्नेन उपोष्या जलवर्जिता जलधेनुं तथा
दत्वा सर्वपापैः प्रमुच्यते स्कंदपुराणे त्वस्यां शर्करजलदानमुक्तं ज्येष्ठे मासि नृप
श्रेष्ठ या शुक्लैकादशी शुभा निर्जलं समुपोष्यात्र जलकुंभान्सशर्करान् प्रदाय
विप्रमुख्येभ्यस्तापत्रयविवर्जितः विष्णुलोकमवाप्येह मोदते विष्णुसन्निधौ
इति निर्जलैकादशीव्रतम् आषाढशुक्लैकादश्यां शयन्येकादशीव्रतं तत्र
१२

व्र०
२०४

लं पृथक्पृथक् मधुरस्वरो भवेन्नित्यं नरो गुडविवर्ज्जनात् तैलस्यवर्ज्जनात्स्यात्सुंदरां
गः प्रजायते कटुतैलपरित्यागाच्छत्रुनाशः प्रजायते योगाभ्यासी भवेद्यस्तु स ब्रह्मप
दमाप्नुयात् तांबूलवर्ज्जनाद्भोगी रक्तकंठः प्रजायते घृतत्यागात्सुलावण्यं सर्वस्निग्ध
वपुर्भवेत् फलत्यागाच्च मतिमान्बहुपुत्रः प्रजायते शाकपत्राशनत्यागी पक्वान्नादो भ
वेन्नरः अभ्यंगस्यपरित्यागाद्दृढपुः सौरूप्यमाप्नुयात् दधिदुग्धतक्रनियमाद्गोलोकं ल
भतेनरः लभतेसंततिं दीर्घां स्थालीपाकमभक्षयन् भूमौ प्रस्तरशायी च विष्णोरनु
चरो भवेत् भूमौ भुंक्ते यस्तु नरः स पृथिव्याः पतिर्भवेत् सदाभुक्तिः सदायोगी मधुमां
सस्यवर्ज्जनात् निर्व्याधिर्नीरुगोतस्वी विष्णुभक्तः प्रजायते एकांतरोपवासेन वि
ष्णुलोकमवाप्नुयात् धारणाद्भवेत्तस्य गंगास्नानं दिने दिने मौनव्रती भवेद्यस्तु त
स्याज्ञास्खलिता भवेत् नमो नारायणायेति जप्यामानसजं फलं पादाभिवंदनाद्वि

राम
२०४

श्लोकौ मंत्रेणानेन पांडुव सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं विबुद्धे त्वयि बुध्येत जगत्सर्वं
चराचरमिति महाभारते आषाढे तु सिते पक्षे एकादश्यामुपोषितः चातुर्मास्यव्रतं कुर्याद्यत्
किंचिन्नियतो नरः सनत्कुमारस्तु चातुर्मास्यव्रतारंभस्य कालांतरमप्याह एकादश्यां तु ग
पा सं न्हीयात्संक्रांतौ कर्कटस्य च आषाढ्यां नरो भक्त्या चातुर्मास्योदितं व्रतमिति संकल्पमंत्र
× श्चतेनैवोक्तः इदं व्रतं मया देव गृहीतं पुरतस्तव निर्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि केशव
गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत् तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति अ
यं च प्रारंभो गुर्वस्तमयादावपि कार्यः तथा च वृद्धगार्ग्यः नष्टे शुक्रे न मौढ्यं च कुलक्रम
दीनेवातिथेः स्वंऽत्र चिंतयेद्वादौ चातुर्मास्यविधौ नरः इति चातुर्मास्यव्रतानि भवि
ष्योत्तरे चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि स्त्री वा नरोपि वा भक्त्या धर्मार्थं सु
दृढव्रतः गृह्णीयान्नियमानेतान्दंतधावनपूर्वकम् तेषां फलानि वक्ष्यामि तत्कर्तॄ

दिव्यसिंहासने स्निग्धे प्रविश त्वं सुरालये आसनं पादोदकं सुरश्रेष्ठ सुवर्णकलशे स्थि
तं गंधपुष्पादिनैर्युक्तं गृहाण रमया सह पाद्यं अष्टद्रव्यसमायुक्तं स्वर्णपात्रस्थितं ज
लं अर्घ्यं गृहाण भो देव भक्तानामभयप्रद अर्घ्यं देवदेव नमस्तुभ्यं पुराणपुरुषोत्तम
मयानीतमिदं तोयं गृहीत्वाचमनं कुरु आचमनं पंचामृतेस्नातः स्नायान्मंत्रैर्वेदोद्
भैरपि मध्येमध्ये प्रपूजा च मधुपर्कपुरःसरं पंचामृतं नदीनां चैव सरसां मयानी
तं जलं शुभं मम अनेनैवाद्य हि स्नानं मंत्रैर्वरुणसंभवैः स्नानं वस्त्रयुग्मं समानीतं पट्ट
सूत्रेण निर्मितं वस्त्रं कार्पासतंतूनां सुवर्णेन विराजितं वस्त्रं नारायण नमस्तेस्तु त्राहि
मां भवसागरात् ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम यज्ञोपवीतं केयूरमुकुटै
श्चैव नूपुरैरंगुलीयकैः पूजितोसि प्रयत्नेन रत्नैराभरणैर्विभो आभरणानि चं
दनं मलयोद्भूतं कस्तूर्यागरुसंयुतं कर्पूरेण च संमिश्रं स्वीकुरुष्वानुलेपनम् गंधः
शतपत्रैः कर्णिकारैश्चंपकैर्मल्लिकादिभिः पुष्पैर्नानाविधैश्चैव पूजितः पुरुषोत्तमः

कृत्वा पेहलाकं दिव्यं स्थानमप्सरसां लभेत् एकभक्तान्नित्यमग्निहोत्रफलं लभेत् ३४

स्तोमभवेद्भूदानजं फलम् विष्णुपादांबुजस्पर्शी कृतकृत्यो भवेन्नरः विष्णोर्देवालये कुर्याद्
पलेपनमार्जने कल्पस्थायी भवेद्वाजन्मनरो नात्र संशयः प्रदक्षिणाशतं यस्तु करो
ति स्तुतिपाठकः हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् अयाचितेन चाप्नोति वापी
कूपप्रपाफलम् द्विजेभ्यश्चान्नदानेन स्थायी स्वर्गे नरो भवेत् पत्रेषु यस्तु रो भुंक्ते
कुरुक्षेत्रफलं लभेत् शिलायां भोजने नित्यं प्रयागस्नानजं फलम् एवमादिव्रतैः पा
र्थ नृहरिमायाति केशवः इति शयन्येकादशीव्रतम् अथाषाढशुक्लैकादश्यां गो
पद्मव्रतं तत्र पूजा चतुर्भुजं महाकायं जांबूनदसमप्रभं शंखचक्रगदापद्मरमा
गरुडशोभितं सेवितं मुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः एवंविधं हरिं ध्यात्वा ततोय
जनं समारभेत् ध्यानं आवाहयामि देवेशं भक्तानामभयप्रदं सुस्निग्धवरदं शां
तं मनसावाहये हरिम् आवाहनं सुवर्णमणिभिर्दिव्यैः खचिते देवनिर्मिते
देशकालौ संकीर्त्य [illegible] ममदेहनिरसनपूर्वकं पुत्रसौभाग्याद्यभिवृद्धिद्वारा श्रीगोपालप्रीत्य
र्थं पंचवर्षात्मकं [illegible] व्रतं करिष्ये इति संकल्पः ४४

रदः कृष्णदर्शनात् उत्साहेनाभ्यगात्तत्र ददर्श यदुनंदनं पूजितश्चैव कृष्णेन विष्टरादिभिरा
दरात् ततश्चोवाचतं विष्णुर्नारदं लोकपूजितं श्रीकृष्णउवाच शृणुलोकस्त्वं वि[illegible]र्षे भुवने
विचरन्सदा लोकांतरेषु चरितं यद्विशेषं वदस्व मे नारद उवाच भगवन्देवदेवेश भ्रमन्कोस्मि
नवचांतिकं तत्राश्चर्यमिदं वक्ष्ये धर्मस्य सदसि स्थितं तत्र सर्वे समासीनाः सुराइंद्राश्च ते
ईशा आकृष्णैकादशरुद्रा आदित्या द्वादश स्मृताः वसवोष्टौ तथा नागायक्षराक्षसपन्न
गाः ते सर्वे यमसमाकृष्टा स्थितं सिंहासने शुभे मानुष्यं दुंदुभेस्मस्मे ध्वादनार्थं वदस्व नः यम
उवाच चातुर्मास्यव्रतं चैकं संक्रांतिव्रतमेव च न कुर्वंति च या नार्यस्तासामाच्छादनं त्वचा
कुर्वंति दुंदुभेस्यास्य विवरध्वंमहाभयं तेन तस्य वचनं श्रुत्वा मया [illegible]विविक्षुर्भवं स्वामिन्निदं
महाश्चर्यमतस्त्वां प्रवदामि च ततः श्रुत्वा त्वरितः कृष्णः प्राह लोकान्पुरः स्थितान् तथा कु
र्वंतु लोका अनार्यपुर्यां न संति हि तच्छ्रुत्वा त्वरितः कृष्णपदे पुनगरेषु च कृष्णास्तेया कु
दूताः प्रोक्तास्तत्सर्वयोषितः पुरः सराः प्रश्नएवं तु राजस्यापुरयोषितः अन्यत्र यत्र कुत्रापि कु

पुष्पं दृष्टोगंगगगलंधपंसुगंधंचमनोहरं गृहाण देवदेवेशधूपोयंप्रतिगृह्यताम् धूपः
एकार्त्तिकासुरश्रेष्टगोघृतेनसुवर्त्तिना संयुक्तातेजसाकृष्णगृहाणादित्यदीपिता दीपः
अन्नंचपायसंमद्यंक्षिनाघृतसमन्वितं दधिक्षीरघृतैर्युक्तंगृहाणसुरपूजित नैवेद्यं
नागवल्लीदलैर्युक्तंपूगीफलसमन्वितं कर्पूरखदिरैर्युक्तंतांबूलंप्रतिगृह्यतां तां
बूलं नीराजनंगृहाणेशपंचवर्त्तिभिरावृतं तेजोराशिमयावृत्तंलोकानंदकरप्रभो नी
राजनं नंदनस्यवसंतैश्चतथाकल्पद्रुमस्यच सुरहस्तच्युतैरीश गृहाणकुसुमांजलिं
पुष्पांजलिः नमस्तेदेवदेवेशनमस्तेगरुडध्वज नमस्तेविश्ववेत्तुभ्यंव्रतस्यफलदाय
क नमस्कारः ततःवायनंदद्यात् मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर व्रतेनानेनसु
प्रीतःसंपूर्णफलदोभव प्रार्थना इतिपूजा अथकथा व्यासंवसिष्टनप्तारंशाक्तेःपौ
त्रमकल्मषं पराशरात्मजंवंदेशुकतातंतपोनिधिं सूतउवाच द्वापरेद्वारवत्यांवैना

देशकालौ संकीर्त्य ममनोयम देह
निरसनपूर्वकं पुत्रपौत्रसौभाग्या

ऋषिभिर्विख्यातं सर्वपापहरं परं सर्वदुःखोपशमनं सर्वसंपत्प्रदायकं यमस्य दंडनं यस्माद्दू घाभ्युद्द्विदा
रीकृतमनुत्तमं सुवासिनीत्वभाग्यादि पुत्रपौत्रप्रवर्द्धनम् ऋषय ऊचुः कस्मिन्मासि क राधाश्रीगोपा
र्थं कृत्वा किंफलं कस्य पूजनं केन वीर्णं पुरा विप्र तत्सर्वं कथयस्व नः सूत उवाच आषा लप्रीत्यर्थं प
ढ्यां शुक्लपक्षस्य एकादश्यां विशेषतः तदारभ्य च कार्तिक्यां द्वादश्यां व्रतं चरेत् गोष्ठे च चवर्याचरि
शुद्धगोस्थाने गोमयेनोपलिप्य च [illegible] त्रिंशच्च पद्मानि गंधपुष्पैः प्रपूजयेत् नेत्संख्यया तगोपनक्र
च कर्तव्या नमस्कारप्रदक्षिणा तत्संख्यया ह्यपूपांश्च ब्राह्मणाय निवेदयेत् प्रथमे वत्स रोद्यापनम
रे चैव द्वितीये चैवमेव हि वायनस्य तथा चैव पायसं सेवनिर्मितं तृतीये मंडकान्दद्याच्च हं कारिये १५
तुर्थे पूर्णमिश्रितान् पंचमे घार्यसंतत्संख्याकाः पूर्णे वत्सरपंचके उद्यापनं प्रकुर्वीत प्रा
दौ चान्ते च मध्यमे एकादश्यामुपवसेद्दंतधावनपूर्वकम् अभ्यंगं तु प्रकुर्वीत स्वास्थि
ते ब्राह्मणैः सह पुण्याहं वाचयित्वा तु प्रतिमायां जपेद्धरिम् कर्षमात्रसुवर्णेन तदर्द्धार्द्धे

श्रुत्वा यदुनंदनं त्वत्सोदर्यं विना स्वामिन्नान्या नार्यो त्र संति हि तच्छ्रुत्वा भयसंत्रस्तः सोदरां प्रत्यभा
षत श्रीकृष्ण उवाच सुभद्रे किं करोषीह आगतायमसेवकाः वृत्ते यानकृते भद्रे सत्यं वद सहोद
रि सुभद्रोवाच सर्ववृत्तान्यहं कृष्ण कार्य्यमत्र न संशयः नो चेत्तव सहोदर्य्यः स्यात्तत्वार्जुनयो
षितः पुत्रोभिमन्युः स्यान्नो चेत् कथय स्वसहोदर श्रीकृष्ण उवाच तथापि भगिनि त्वं हि
व्रतमेकं चर स्वाहि गोपद्ममिति विख्यातं व्रतं लोकेषु विश्रुतं सूतेन कथितं पूर्वं ऋषी
णां हितकाम्यया नैमिषे हि मवत्सापर्श्वे स्थितः पृष्ठममनुत्तमम् तत्र सूतं समासीनं सर्वज्ञा
न विदां वरं तं दृष्ट्वा मुनयः सर्वे पादयोस्तेनता मुनेः स्वार्चितास्तेन मुनिना ह्यर्घ्यादिभि
र्यथाविधि अभ्यर्च्य तं मुनिं विप्राः ऊचुस्ते प्रश्नपूर्वकं ऋषय ऊचुः सर्वाल्लोकस्य धर्म
ज्ञः भक्तस्य ज्ञानसाधनं समर्थं सर्वमंत्रार्थं सर्वसौभाग्यकारकं कृपया मुनिशार्दू
ल कथय स्वोत्तमं व्रतम् सूत उवाच शृणुध्वं मुनयः सर्वे व्रतानामुत्तमं व्रतं गोप

व्र०
२०८

हष्ट्वा ताडयामासुर्व्रतस्यास्य प्रभावतः पलायंत ममता भीताः स्मरंतो यमशासनं तान्दृष्ट्वा
नक्रद्वेग्धांगान्यमेभयसमन्वितः कस्येदं कृत्यमिति विज्ञात्वातींद्रियदर्शनात् उवाच
दूताः स्म एवं तु यत्र संपूज्यते हरिः भवद्भिस्तत्र गंतव्यं हरेरद्भुतकर्मणः तस्य व्रतमि
दं तत्र पश्यतो हितवाञ्जातं प्राप्नुवंतो दैववशात् किं कुर्म्मः प्रचरंतु गां इत्युक्तो धर्मरा
जो मौशाल्योपांत विवेश ह तेनैव कृष्णेन मुह्यं कथितं व्रतं मदग्राम् दमयंत्या च
पांचाल्या राज्यभ्रंशा हृतं कृतं व्रतस्यास्य प्रभावेन राज्यसौभाग्यसंपदः पुत्रपौत्रादि
सौख्यं तु भक्त्या भीतं समवाप्नुयात् ऋषय ऊचुः त्वत्प्रसादात्कृतार्थाः स्म गतमः स्वास्त्र
मान्वयं प्रणम्य मुनिभिः साकं तत्रैवांतरधीयत मुनिभिः सर्वलोकेषु कथितं व्रतमु
त्तमं नातः परतरं पुण्यं त्रिषु लोकेषु विश्रुतं इति श्रीभविष्योत्तरपुराणे गोपद्म
व्रतस्य [illegible] कथा कार्तिकशुक्लैकादश्यां प्रबोधनविधिर्हेमाद्रौ ब्राह्मे राकादश्यां

राम
२०८

नवापुनः पुनर्व्रीह्यन्नान्यपि सतिलाज्यसमिहुतं पायसं च घृतं वा होमं कृत्वा पूर्णाहुतिं चरेत् पुं
वत्ससहितां धेनुं आचार्याय समर्पयेत् ब्राह्मणांश्च योषिद्भिर्भोजयेत् बंधुभिः सह भुंजीत
बंधुभिः सार्द्धमेकाग्रकृतमानसः अन्यानपि यथाशक्त्या ब्राह्मणानपि भोजयेत् इदं व्रतमि
हापुण्यं कुर्वन्मुनिपुंगवाः इह भुक्त्वा तु विपुलान्सर्वान्कामान्मनोरमान् अंते स्वर्गपदं
गच्छेत्सर्वपापविवर्जितः कृष्णस्य वचनं श्रुत्वा सुभद्रा तु तथाकरोत् पंचाब्दं व्रतमेतत्
स्याः द्वात्रौयामचतुष्टये तत्सर्वं चरितं कृत्वा प्रातः कृत्वा तु नाशनं एवं कृते व्रते तस्मिन्का
लेयमभटा विशन् यमभटाऊचुः सुभद्रे तव देहस्य यमार्थे चागता वयं लोकेस्मिंस्तुव
तं येन न कृतं भक्तिपूर्वतः तच्चर्मणापि नद्धं वापटहो यमशासनात् सुभद्रोवाच भ
टाः पश्यत मेचीर्णं गोप जव्रतमुत्तमं दत्ता पुंवत्ससहिता धेनुर्विज्ञायदक्षिणा गोष्टे
पश्यानि सर्वपश्यसर्वंपश्यं तु हे भटाः अन्योन्यवादसमये विष्णुदूतास्तदागताः तान्

पजगन्नाथं वेणुवीणादिनिःस्वनैः शंखकाहलमुरजवाद्यैर्नृत्यगीतकैः जयशब्दैस्त
थास्तोत्रैर्नैवेद्यैर्नृत्यमंडपं सुगंधतैलेनाभ्यज्य स्नापयेत्पुरुषोत्तमं पंचामृतैर्नालिकेरैर
सैःफल सैस्नपा सुगंधामलकेनाघल्लेपयेद्गंधचंदनैः पुष्पाधिवासितैश्चेवस्त्रयागंधाधिवासितैः
स्नापयमानस्तु गोविंदं ये पश्यंति मुदान्विताः कम्पतेसुदृढं पापं तेषामाजन्मसंचितम् कुंकु
मागरुकस्तूरीकर्पूरैश्चंदनान्वितैः ततो वै मालतीमालां चंद्रपूर्णयुतां ददेत् महोप
चारैः संपूज्य विष्णुं नीराजयेत्ततः कृतांजलिपुटो भूत्वा प्रार्थयेत्पुरुषोत्तमम् चराचर
मिदं सर्वं त्वदेकशरणं विभो अनुग्रहामृतालोकै राप्यायस्व जगद्गुरो नृत्यगीतैः प्रदक्षिण
कैरात्रिशेषं नयेद्व्रती प्रायनादुत्थितं देवं ये पश्यंति गदाधरं सर्वकामानवाप्नुवंति अश्व
मेधफलं लभंति ते इत्युत्थापनमहोत्सवविधिः अथ कार्तिकशुक्लैकादश्यादि ७॥
भीष्मपंचकम् हेमाद्रौ नारदीये नारद उवाच

चपुष्पाञ्जलिं गृहाण मम केशव इदं विष्णुरिति श्लोको मंत्रउत्थापने हरेः समुत्थिते ततो वि-
ष्णौ क्रियाः सर्वाः प्रवर्त्तयेत् मङ्गल्यैरवोमाद्यैर्भ्रामयेत्स्यंदने स्थितं उत्थितं देवदेवेशं न-
गरे पार्थिवः स्वयं रात्रौ प्रजागरं कुर्याद्देकादश्यां सुरालये प्रभाते विमले स्नात्वा द्वादश्यां
विष्णुमर्च्चयेत् होमयेद्द्रव्यवाहं तु होमद्रव्यैर्घृतादिभिः ततो विप्रान्नुपश्चैश्च भोजयेदन्न
विस्तरैः घृतक्षीरदधिक्षौद्रकासारगुडमोदकैः श्रावणस्कंदयोः पुरुषोत्तममाहात्म्ये
अतः परं शृणु तवै उत्थापनमहोत्सवं पूजयित्वा जगन्नाथं कौमुद्यां रथमहोत्सवे आ-
श्विन्यां अश्वक्रीडादिभिः पुष्पवस्त्रमाल्यानुलेपनैः ततः प्रभाते संकल्प्य कार्त्तिकव्र-
तमुत्तमं व्रतेनानेनैव नयेद्यावदेकादशी सिता तस्यामुत्थापयेद्देवं संपूज्य जगदीश्व-
रम् उत्तिष्ठ देवदेवेश तेजोराशे जगत्पते वीदेपेतनस्य कल्लं विध्वंसमप्रुप्तं तव मायया प्रफु-
ल्लंपुण्डरीकश्रीदासिरीणनयनेनवे त्वयाहस्तं जगदिदं पावित्रं परमेष्यति इत्युत्त्था

व्र०
२११

निवेदयेत् एवमभ्यर्च्य देवेशं स्तुत्वा चैवं प्रणम्य च ॐ नमो भगवते वासुदेवाय परमात्मने निवेद
येत् घृताक्तं जुहुयाद्वह्नौ न देवाष्टोत्तरं शतं जुहुयात्तु घृताभ्यक्तं तिलव्रीहियवं व्रती षडक्षरे
ण हेमस्तु स्वाहाकारान्वितेन च ॐ नमो विष्णवे इति षडक्षरो मंत्रः उपास्य पश्चिमां संध्यां प्र
णम्य गरुडध्वजं जपित्वा पूर्ववन्मंत्रं क्षितिशायी भवेत्ततः सर्वमेतद्विधानं तु कार्यं पंच
तिथिष्वपि विशेषोक्ते व्रते वास्मिन् यदन्यूनं श्रृणुष्व तत् प्रथमेऽह्नि हरेः पादौ पूजयेत्कम
लोद्भवैः द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत् पूजयेच्च तृतीयेऽह्नि नाभिं भृंगारकेन तु
बाणबिल्वजपाभिश्च ततः स्कंधौ समर्चयेत् अर्चयित्वा हृषीकेशं एकादश्यां विशेषतः त्रिः
प्राश्य गोमयं सम्यक् एकादश्यामुपावसेत् गोमूत्रं मंत्रवद् द्वादश्यां पूजयेद्व्रती क्षीरं
चैव त्रयोदश्यां चतुर्दश्यां तथा दधि संप्राश्य कायशुद्ध्यर्थं लंघनीयं चतुर्दिनं प्राशनं हे
म मंत्रेण तिहेमाद्रिः पंचमे तु दिने स्नात्वा विधिवत्पूज्य केशवं भोजयेद् ब्राह्मणान्भक्त्या ते
भ्यो दद्याच्च दक्षिणां व्रतोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः ततो नक्तं समश्नीयात् पंचगव्य
ततो तु पूजयेच्छ्रीशं मालत्या चक्रपाणिनः कार्त्तिक्यां देवदेवस्य भक्त्यान्तं न्यायमानसः पूजयेज्जपमं
त्रेण गंधधूपं निवेदयेत् ४५

राम
२११

वि

यदेतद्भवलेषु एवं व्रतानां परमं व्रतं कर्त्तव्यं कार्त्तिके मासि प्रयत्नाद्भीष्मपंचकम् विधानं तस्य सर्व
स्वं फलं चापि तत्तो वदं कथयस्व प्रसादेन मुनीनां हितकाम्यया ब्रह्मोवाच प्रवक्ष्यामि महापु
ण्यं व्रतं व्रतवतां वर भीष्मेणोक्तं हि संप्राप्तं व्रतं पंचदिनात्मकं सकाशाद्वासुदेवस्य ततो क्रं भीष्म
पंचकं व्रतस्यास्य गुणान् वक्तुं कः शक्तः केशवादृते व्रतं चैतन्महापुण्यं महापातकनाशनं अ
भी०पं० ५ तो व प्रयत्नेन कर्त्तव्यं भीष्मपंचकं कार्त्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः एकादश्यां
तु गृह्णीयात् व्रतं पंचदिनात्मकं प्रातः स्नानविधानेन मध्याह्ने च यथाविधि नद्यां वा विझुगर्त्ते वा
समालभ्य च गोमयं यवव्रीहितिलैः सम्यक् पितॄन् संतर्पयेत् क्रमात् स्नात्वा मौनं ततः कृत्वा धौ
तवासा दृढव्रतः ततः संपूजयेद्देवं सर्वपापहरं हरिम् स्नापयेत्परया भक्त्या मधुक्षीरघृतेन च
वा तीर्थेन पंचगव्येन गंधचंदनवारिणा चंदनेन सुगंधेन कुंकुमेनाथ केशवं कर्पूरोशीर
मिश्रेण लेपयेद्गरुडध्वजं अर्चयेच्चित्रैः पुष्पैर्गन्धधूपसमन्वितैः गुग्गुलुं घृतसंयुक्तं
दहेद्दत्त्वा यभक्तिमान् दीपकं तु दिवारात्रौ दद्यात् पंचदिनानि तु नैवेद्यं देवदेवस्य परमान्नं

वृ०
२१२

ना ब्राह्मणाय प्रदातव्या धर्मो मे प्रीयतामिति तत्तद्व देवदेवस्य कृष्णस्याक्लिष्टकर्मणः प्रतिमा
देयेत्यनुषंगः कृत्वा पूजां यथाशक्त्या विप्राणां वेदवादिनां दद्याद्धिरण्यं गां चैव कृष्णो मे प्री
यतामिति अन्येषामपि दातव्यं सत्कृत्य वस्त्रवाधितं कृतकृत्यः स्थिरो भूत्वा विरक्तः संयतो भवे
त् नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः अष्टपादैकनयनः शंकुकर्णो महास्वनः जटी
छिजिकृत्तामात्तो मृगराजतनुच्छदः चिंतनीयो महादेवो यस्य रूपं न विद्यते व्रतदेवस्य विष्णोरिदं
६६ रूपं भीष्मेणाकथितं प्रावर्तनल्पगते नमे ब्रह्मचारिगृहस्थो वा वानप्रस्थोथवा यतिः प्राप्नो
ति वैष्णवं स्थानं तत्कृत्वा भीष्मपंचकं ब्रह्महा मद्यपः स्तेयी गुरुगामी सदा व्रती मुच्यते पा
तकान्मर्त्यः कृत्वेदं भीष्मपंचकं मुच्यते पातकाच्छ्रुत्वा पाठको विष्णुलोकभाक् धन्यं पु
ण्यं पापहरं युधिष्ठिर महाव्रतम् यत्कृत्वा ब्रह्महा गोघ्नः सर्वपापैः प्रमुच्यते यद्भीष्मपंचक
मिदं प्रथितं पृथिव्यामेकादशीप्रभृति पंचदशीनिवद्धम् भून्यं भोजनपरस्य तस्मिन्निष्फ

राम
२१२

न्तं नरस्य १

पुरःसरं एवं सम्यक् समाप्य स्नाद्यथोक्तं व्रतमुत्तमं सर्वपापहरं पुण्यं प्रख्यातं भीष्मपंचकं जन्मप्रभृ
तियत्पापं त्यक्त्वा पुण्यं समाप्नुयात् न तत्फलं समवाप्नोति संत्यक्त्वा भीष्मपंचकं मद्यपो यस्त्यजेन्म
द्यं जन्मतो मरणांतिकं तद्भीष्मपंचके त्यक्त्वा संप्राप्नोत्यधिकं फलं भविष्योत्तरे कार्त्तिके शुक्लप
क्षस्य कृष्ण धर्मं पुरातनं एकादश्याः समारभ्य विज्ञेयं भीष्मपंचकं पुष्करं सत्वहीनानामशक्यं
काल्पचेतसां पापधीः परिहर्त्तव्या ब्रह्मचर्येण निरुत्या शाकाहारेण मुन्यन्नैः कृष्णार्चनपरैर्नरैः
स्त्रीभिर्भक्तेन कर्त्तव्यं सपत्नुः पुण्यवर्द्धनम् विधवाभिस्तु कर्त्तव्यं पुत्राणां सुखलब्धये सर्वका
मसमृद्ध्यर्थं कर्त्तव्यं चैव पांडव नित्यं स्नानेन दानेन कार्त्तिकी यावदेव तु वैश्वदेवस्तु कर्त्तव्यो वि
ष्णुध्यानपरायणैः वैश्वदेवस्य व्याहृतिहोमो वा कार्य्यः पापस्य प्रतिमा कार्य्या रौद्रवक्त्राति भी
षणा खड्गहस्ताति विकृता लोहितदंष्ट्राकरालिनी तिलप्रस्थोपरि स्थाप्या धर्मराजस्य नामभिः
यमाय धर्मराजाय इत्याद्यैः इमममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः यदन्यजन्मनि कृतं मिह जन्
मनि वा पुनः पापं प्रणाशमायातु तव पादप्रसादतः एवं संपूज्य विधिवत् प्रतिमां च सकांच

कार्यावर्धनक्षोपवासिनी मध्याह्नेतुनरः स्नात्वा नित्यं वैवर्जितक्रियः रात्रौ सुरभिमानीयकृ
त्वा मर्दयेद्यथाविधि पूर्वोक्तवीवेधानेनवा कृत्वा गोः किलभूतले अग्रपादात्समारभ्य पश्चा
त्पादद्वयावधि गोपुच्छं तु समासाद्य कुर्याद्वापितनर्दनं ततः प्रभातके नेव्याशास्न
दृ ह विधानतः गांचैव स्नापयेद्युक्तः चंदनेनानुलेपयेत् गंधतोयेन चरणौ शृंगप्र
क्षाल्य शाक्तितः ततो तु पूजयेद्गंगां पुष्पैर्गंधादिवासितैः मंत्रैः पुराणसंप्रोक्तैः य॰
थास्थानेयथाविधि अथ पूजा गोः अग्रपादाभ्यां नमः स्थानेष्वेतेषु गंधाक्षतादि
पेच्छसुद्धमानसः ४ गोः आस्याय नमः गोः शृंगाभ्यां नमः गोः स्कंधाभ्यां॰ गोः पुच्छाय ४
पश्चात्पादाभ्यां ४ पादाभ्यां॰ गोः सर्वांगेभ्यो नमः ४ पंगौर्धूपः प्रतिगृह्यतां धूपः अ
स्थिपत्रादिकं घोरं वनं वैतरणीतथा प्रसादात्ते तरिष्यामि गोमातस्ते नमो नमः सु
रवेनतीर्थं नेयस्नान्न दीवैतरणी ध्रुवं तस्मादेकादशीं कृत्वा नाम्ना वैतरणी भवेत्

ष्ट

पान्ते

लंदिशन्ति पांडवशार्ङ्गधन्वा पंचाहं वंगव्याशी भीष्मायार्घ्यं तु पंचम् अलस्वपितया दद्या
न्मंत्रेणानेन पांडव वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च अपुत्राय ददाम्येतज्जलं भीष्मा
यवर्मणे वसूनामवताराय शंतनोरात्मजाय च अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचा
रिणे इति हेमाद्रौ भीष्मपंचकम् मार्गकृष्णैकादश्यां वैतरणीव्रतं हेमाद्रौ भविष्योत्तरे कृ
ष्ण उवाच शरतल्पगतं भीष्मं पर्यपृच्छद्युधिष्ठिरः व्रतेन येन पुण्येन यमलोकं न दृश्यते
नारी वा पुरुषो वापि शोकं चैव न पश्यति तन्ममाचक्ष्व धर्मज्ञ पितामह कृपां कुरु भीष्म उवा
च एकादशी वैतरणी तां कृत्वा तु सुखी भवेत् यमलोकं न पश्येच्च शोकं चैव न विन्दति यु
धिष्ठिर उवाच केन तात विधानेन कर्तव्या सा महाफला पितामह समाख्याहि तद्विधानं
ममप्रभो भीष्म उवाच एकादशी तिथिः कृष्णा मार्गशीर्षगता नृप नाम्ना सा तु नरैः स
म्यग्गृहीत्वा नियमं शुचिः एकादशी तिथिः कृष्णा नाम्ना वैतरणी शुभा सा व्रतेन मया

गुर्जरेषु प्रसिद्धं अथ मोक्षायनं शुक्लैकादशीव्रतं हेमाद्रौ भविष्योत्तरे युधिष्ठिर उवाच अघघातः
कृष्णमे शुक्लैकाद्वादशीं परमां वद प्रतमयावशेषायद्गताः सर्वे मनोरथाः द्वादश्यपंत्रैकादशी
ति हेमाद्रिः कृष्ण उवाच यद्दृष्टेन्सफलं जन्म जीवितं च सुजीवितं विनाशंसर्वपापानां सकृ
येद्वादशीमिमां युधिष्ठिर किमिष्टेन शिष्टैरन्यैरनुष्ठितैः दृष्ट्वानीतरदुर्गाण्यतो बयस्त्वके
शवं मार्गशीर्षसिते पक्षे द्वादशीमारभेद्दिमां यदाहिमक्षिरूपस्त्वन्नाद्देवदेवे जनार्दने एकाद
शपामनाहारो मासि मासि त्वयेश्वरि मू द्वादशपां द्वादशैतानि नामानि परिकीर्तयेत् केशवं मा
र्गशीर्षे च पौषे नारायणं विदुः माधवं माघमासे तु गोविंदमथ फाल्गुने चैत्रे विष्णुं तथा
विद्याद्वैशाखे मधुसूदनं त्रिविक्रमं तथा ज्येष्ठे आषाढे वामनं विदुः श्रावणे श्रीधरं विद्या
हृषीकेशं तु भाद्रके पद्मनाभं चाश्वयुजि पक्षाद्दामोदरं विदुः एवं द्वादशभिर्मासैर्व्रतपा
रं गमिष्यति व्रतांते ब्राह्मणान् शांतान् मासं मासं त्वाश्विमंत्रयेत् मासनाम्ना तथादे

आनंदकृत्सर्वलोके देवानांच सदाप्रियः गोसंज्ञकाह्नितज्ञानाद्ये दीपोयं प्रतिगृह्यतां दीपः आच्छा
दनं गवे दद्यात्सम्यक्कुंकुमनिर्मलं सुरभिर्वैस्वदानेन प्रीयतां परमेश्वरी वस्त्रं मार्गशीर्षादि
कं भक्त्या यावन्मासचतुष्टयं अन्यान्मासचतुष्कं तु पावकाशनमेव च आवरणादिकुमासेषु
चतुर्ष्वद्याच्चपायसं तदन्तसप्तयोमामागोगुरुत्वार्थमेव च नैवेद्यं हि मयादत्तं सुरभिः प्रीय
तामिति द्वितीयं गुरवे दद्यात्तृतीये स्वयमेव च मासान्मासं प्रकुर्वीत मासद्वादशकं व्रतम्
उद्यापनं ततः कुर्यात्सौवर्णं वत्सरे तथा शय्यासतूलिका कार्या दंपत्योः परिधानकं सर्व
स्वाकृत्सवर्णां तु धेनुः कार्या पयस्विनी सौवर्णां सुरभिं कृत्वा स्थापयेत्तूलकोपरि सुरभिं
पूजयेन्मंत्रैः पूर्वोक्तैर्भक्तिसंयुतैः ततस्तु गुरवे दद्यात्सर्वं तत्र समापयेत् नारी वा पुरुषो
वापि व्रतस्यास्य प्रभावतः राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते भारोलोहस्य दातव्यः
कार्पासद्रोणसंयुतः वैतरण्याः समाप्त्यर्थं ब्राह्मणाय कुटुंबिने इति वैतरणीव्रतं इदं च

व्र०
२१५

यतेपुंसां यथा तद्ब्रूहि भूधर श्रीनारायणउवाच समस्तपातकहरं स्वर्गदं सर्वकामदं नस
म्यक्कृष्णद्वादशपाः किंचिदस्यपरं भुवि मार्गशीर्षे कृष्णपक्षे दशम्यामेकभुक्नरः एकादश्या
मुपवसेत्कृष्णस्यार्चां समर्चयेत् सौवर्णीं राजतीं ताम्रीं कृष्णमूर्तिं चतुर्भुजां अदत्तेचुवक
लशे तत्र कृष्णं प्रपूजयेत् स्नात्वा च कृष्णैस्तिलैः प्रभाते दद्याच्च सम्यक्तिलपात्रयुक्तं न
मोस्तु कृष्णाय पितॄश्च मातुर्हित्वा ह्यघं प्रापयतौ अर्घ्यं दत्वा ततः सम्यक्कृष्णं संपूजये

स्वगतौ

द्बुधः अश्नीयान्मासि मास्येवं कुर्यात्संवत्सरं व्रती नामानि देवदेवस्य केशवस्य पृथ

पृथक्

क् कृष्णोऽनंतोऽच्युतश्च क्रीवैकुंठ गोपजनार्दनः उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः
योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात् एतानि प्रातरुत्थाय यः स्मरेत्पुरुषः
सदा अपि दुर्गतिगामस्तत्पापं नरः स्वर्गमाप्नुयुः तिलपात्रद्वादशकं यो द
द्यात्प्रत्यहं द्विजे गावश्च कपिला देया जपेन्नामानि तैः समम्

राम
२१५

वंपाद्यार्घ्यादिभिरर्चयेत् द्वादशान्नघटांश्चैव तिलपात्रजलैर्युताः देयास्ततोत्तिसंपूर्णे ले
ख्या द्वादशनामभिः ततो देवस्य पुरतो गोष्ठे वा होममारभेत् मंत्रेणेदं विष्णुरिति सभि
दाज्यघृतोदनैः तैरेव च यजेत्पश्चान्मंत्रैर्द्वादशनामभिः धेनुःश्वेतात् [illegible] दातव्या कपि
लावा सकांचना माघस्नानस्य यत्पुण्यं गंगासागरसंगमे तत्फलं समवाप्नोति श्रुत्वे
दं द्वादशीव्रतं यो वाद्वशीव्रतमिदं विदधाति मर्त्यः सुश्वेतधेनुवरदक्षिणमद्भमेकं
तस्याशुभं सकलमाशु विनाशमेति श्रीपद्मनाभपदपंकजपूजकस्य इति शुक्ले
कादशीव्रतं अथ कृष्णैकादशीव्रतं हेमाद्रौ वाराहे धरण्युवाच ब्रह्महा हेमहृत्गो
घ्नः सुरापो गुरुतल्पगः कृतघ्नो गरदः स्त्रीघ्नो ग्निदो विश्वस्तमित्रहा विप्रसाधुसुहृ
न्मित्र [illegible] देववृत्तिहरोधमः यज्ञहंताग्निहोत्रघ्नः परस्त्रीनिरतोधमः हत्या
दिपापोपहतपितृवर्णोत्तमस्यघः पतितोनरके घोरे भ्रूतप्रेतत्वमागतः निवृत्तिनी

ब्र०
२१६

णं सवत्सां द्विजमुख्याय पूजयित्वा समर्पयेत् कृष्णभक्ताय शांताय विधिज्ञाय महात्मने
नैष्ठीयंतामिति प्रोक्ता देवानुद्धाद्दशमासिकान् मामेवमुद्धरस्वेति गवां वाच्यः प्रतिग्रहः
मासि मासि भवेन्नेषु तिलपात्रयुते घटैः सहार्थं नतीया प्रतिमासं युक्त तिलपात्रदाने
प्ययं मंत्र इत्यर्थः तस्मिन्काले प्रदातव्यास्ते घटा मासनामभिः समाप्य तु व्रतं पुण्यं तस्मा
दर्घ्यं समर्पयेत् सूर्यायेति शेषः समाप्तेस्मिन्व्रते सूपयदभीष्टं तदाप्यते महारौरव
पूर्णेभ्यो नरकेभ्यो पितारयेत् स्वपितॄन्सन्तिथ्यम्पः सचकल्पप्रदानैरपि ब्रह्महत्यादिपा
पानां अश्वमेधैर्भवेत्तृप्तयः अश्वमेधाद्याश्वाप्ताहुतमेतद्विशिष्यते पितॄणामात्मन
श्चैवं तारकं सर्वकर्मदं नरकस्थास्तु ये केचिद्धर्मवासैरणे चये येचाल्पमरणाये च भू
तप्रेतत्वमागताः नेच्छंति संततिं येच मुच्यंते तेपि किल्बिषैः उत्तारयेत्पितृगणान्दश पूर्वा
न्दशापरान् आत्मानमेकविंशं च कृष्णद्वादशपुण्यप्रभावणात् इति वाराहे कृष्णैकादशी

राम
२१९

मासोपवासिनां पुण्यं यज्वनां तीर्थयायिनां स्याज्जपैर्दैवदेवस्य द्वत्यहं मासनामभिः प्र
तिमासं स्वनाम्नैव पूजादानादिकं हरेः स्वनाम्ना पूर्वोक्ततत्तन्मासनाम्नेत्यर्थः कृत्वांते
च ततो होमः कार्यस्तद्देवनामपदैः अग्नेश्वतांते अग्निप्रणयनादूर्ध्वं द्वादशैतानतुस्म
रेत् द्वादशाश्वत्थपत्रेषु स्थापयेच्छुक्लतंडुलैः ॐ नमस्तेनमः आवाहनसहत्यावाहयेत्
त्पृथक् संस्थाप्याग्निं ततः प्राच्यां ध्यायेन्नानात्मसंभेरवान् आसनंपाद्यमर्घ्यं च गंध
पुष्पार्चनानि च धूपदीपाश्च वासांसि होमशेषं समापयेत् दत्वा चाचमनं पश्चाद्धोम
शेषं निवेदयेत् अष्टाष्टसमिधो होमे कृत्वाष्टाष्टघृताहुतीः यवस्याहुतिरेकैका अष्टाष्टो
च तिलाहुतीः अग्निप्रतिष्ठितं होमं देवेभ्यश्च निवेदयेत् पूर्णाहुतौ भवेन्मंत्रः तद्विष्णोः प
रमं पदं एवं कृते तु होमांते गाः कुर्याद्द्वादशाष्टवा षट् च तस्यो द्वावादेया एकां वापि पय
स्विनी हेमशृंगी रौप्यखुरी सघंटाभरणांबरा कांस्यदोग्ध्री ताम्रपृष्ठी सुवर्णेन रदक्षि॰

रणां व्रजेत् स्ववर्णाचारविधिना कृतकृत्यो गृहं व्रजेत् पूजयेत्तत्र गोविंदं केशवेति जपन् बुधः
पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि गीतवाद्यैः कथाभिश्च जागरं कारयेन्निशि कुंभं सं
स्थापयित्वा तु रत्नगर्भं सकांचनं छादितं वस्त्रयुग्मेन सितचंदनचर्चितं गंधमाल्यसमा
युक्तं दीपैर्दिक्षु स्वलंकृतं कुंकुमाक्तामग्रदेशे सितचंदनचर्चितां प्रतिमां देवदेवस्य शंख
चक्रगदाभृतः कृत्वाभ्यर्च्य यथान्यायं प्रभाते विमले सति द्वादश्यां कृतकृत्यस्तु समभ्यर्च्य
जगद्गुरुं विप्राय दद्यात्कलशं दक्षिणापावकान्वितं पावकं सुवर्णं संभोज्य विप्रमुख्या
य दद्याच्छक्त्या च दक्षिणां भक्ष्यान्नं भोजयित्वा तु दद्याद्गोयुगवान्छितं पंचगव्यं तु संप्रा
श्य स्वयं भुंजीत वाग्यतः अनेन विधिना मासि तस्मिन्कृष्णामुपोषयेत् द्वादशीपुरुष
व्याघ्रं ध्यायन्संकर्षणं प्रभुं प्राग्वत्सर्वं ततः कृत्वा ब्राह्मणाय निवेदयेत् भोजयित्वा द्वि
जश्रेष्ठं दद्यात्तस्मै च दक्षिणां भुंजीत वाग्यतः पश्चात्पंचगव्यकृताशनः एवं पौषेतु
संकल्प्य द्वादशीं शुक्लपक्षतः नारायणं जपेत्प्राज्ञः सर्वं प्राग्विधिमाचरेत् स्नानं

व्रतं अथोभयैकादशीव्रतं हेमाद्रौ भविष्योत्तरे युधिष्ठिर उवाच कृस्नकृस्न नमे ख्याता द्वादशी
केन हेतुना किं स्नातेन प्रियादेव किं वा ख्याता न युज्यते श्रीकृस्न उवाच नैकस्य चिन्मया ख्यातं
गुह्यमेतदनुत्तमं महापुण्यप्रदं पार्थ महापातकनाशनं वांछितार्थप्रदं नृणां श्रुतं पापाप
हारकं श्रेष्ठं व्रतानां सर्वेषां शुभदं द्वादशीव्रतं तदहं संप्रवक्ष्यामि समाहितमनाः शृणु न
तोपराह्ने संतर्प्य कृतसंध्यादिकः शुचिः प्राप्यात्रौ वेदविद्भः पुराणज्ञो जितेंद्रियान् सं
पूज्य देवदेवेशं दन्तधावनपूर्वकं कुर्याच्च नियमं पार्थ गृहदेवाग्निसन्निधौ एकादश्यां
निराहारः स्थित्वाहमपरेहनि भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत इत्युच्चार्य गुरुं
नत्वा पूजयित्वा जनार्दनं भूमौ स्वपेत् जितक्रोधः शब्दादिविषयैर्जितः ततः प्रभाते विम
ले केशवार्पितमानसः केशवेति तदा वाच्यं अनृतप्रस्खलितादिषु पाखंडादिभिरालापं
दर्शनं स्पर्शनं तथा त्यजेद्दिनत्रयं पार्थ व्रतं वैकल्यकारकं ततो मध्याह्नसमये नद्यादौ
विमले जले स्नानं कुर्याज्जितक्रोधः पंचगव्यपुरःसरं आदित्याय नमस्कृत्य केशवं श

स्थितः =

मयांजलिः इत्युच्चार्य तुलसिदलैस्तु गंधपुष्पाक्षतैर्युतं पूर्ववद्देवमभ्यर्च्य दानं दद्यात्स्वशक्ति
नः विष्णुर्मे प्रीयतां देवो जगद्योनिः सनातनः अस्मिन्मासि तथा कृष्णद्वादश्यां विधिना
क्षिपेत् स्नाने भोजनकाले तु जपन्वै पुरुषोत्तमं वैशाखे चामले पक्षे पूजयेन्मधुसू
दनं दक्षिणां गुरवे दद्यात्प्रीयतां मधुसूदनः मासेऽस्मिन्कृष्णपक्षे तु यजेद्देवमधोक्ष
जं ज्यैष्ठमासामले पक्षे द्वादश्यां पूर्ववन्नृप स्नानादि सर्वं निर्वर्त्य पूजयेच्च त्रिविक्र
मं द्विजेभ्यो दक्षिणां दद्यात्प्रीयतां मे त्रिविक्रमः इत्युच्चार्य नरव्याघ्र स्वयं भुंजीत पूर्व
वत् ज्येष्ठस्यैव हि कृष्णायां द्वादश्यां तु विशांपते स्नात्वा प्राग्विधिना भक्त्या नृसिंहं पू
जयेद्विभुं पुष्पैर्धूपैस्तथा दीपैर्गंधैर्नैवेद्यकैरपि आषाढस्यैव द्वादश्यां शुक्लायां
तु नृपोत्तम वामनं पूजयेद्देवं दद्याद्विप्राय दक्षिणाम् वामनः प्रीयतां देवो मम नि
त्यं सनातनः आषाढस्यैव कृष्णायां द्वादश्यां प्रयतः शुचिः पूजयेदच्युतं देवं तेनैव वि

प्राशनं तानि भोजनं तद्वदाचरेत् ब्राह्मणेभ्यस्तथा दद्याद्दक्षिणां पांडुनंदन नारायणः प्री
यतां मे इत्याचार्यं क्षमापयेत् अस्यैव पुष्यमासस्य द्वादश्यां कुरुप्रवर ततः वासुदेवेति संपू
ज्य प्रागुक्तविधिनान्नृप वासुदेवं जगन्नाथं सर्वकारणकारणं ततो दद्याद्द्विजातिभ्यो
दक्षिणां श्रद्धयान्वितः भोजनं पूर्ववत्कुर्यात्प्राशनं पूजादिकं ततः शुक्लायां माघमास
स्य द्वादश्यां तु विशांपते माधवेति जपन्नाम पूजयेद्धरिम् रात्रौ जागरणं कुर्यात्पुष्पधूप सूर्वव४
प्रदीपकैः पूजयित्वा द्विजश्रेष्ठान् माधवः प्रीयतामिति प्राशनादिकमेवात्र पूर्वोक्त
विधिना स्मृतं अस्यैव माघमासस्य द्वादश्यां कुरुप्रवर ततः त्र्यम्बकेति जपन्नाम्नः संर्व
प्राग्विधिनाचरेत् चैत्रस्यामलपक्षे तु द्वादश्यां पांडुनंदन पंचगव्यजलैः स्नात्वा विष्णुना
मानुकीर्तयेत् उपस्थानं तु कुर्वीत भास्करस्य विचक्षणः य एव भास्करो देवः स एव वि
ष्णुः प्रकीर्तितः विष्णुर्भवतु सुप्रीतो देवदेवः सनातनः भुक्तिमुक्तिप्रदानायतवदत्तो

नयेत् हरिर्मे प्रीयतां देवो मंत्रमेतदुदीरयेत् कार्त्तिकस्य तु मासस्य द्वादश्यां शुक्लपक्षतः आद्ये
न विधिना सर्वं स्नानादि विनिवर्त्य च दामोदरेति संपूज्य मूर्त्तिं देवस्य चक्रिणः कृष्णेत्येवं तु निर्व
र्त्य द्वादशी कार्त्तिके तदा कृष्णेति नाम्ना संपूज्य देवदेवस्य चक्रिणः प्रागुक्तोऽस्य विधिः पार्थ वि
शेषात्तु विधीयते अत्र देयानि दानानि षोडशैव विदुर्बुधाः गोलक्षं गोसहस्रं वा गोशतं द्वाद
शैव गाः तुलापुरुषदानानि मुख्यानि विधिवत्तदा देयानि विप्रमुख्येभ्यो व्रतान्ते समुपस्थिते
चंद्रसूर्योपरागे तु कुरुक्षेत्रे कुरूत्तम हेमभारशतं दत्वा तत्फलं तद्दिने भवेत् उभयद्वादशी
योगाच्छ्रद्धानेन नरोत्तम कृत्वान्मुक्तस्य सप्तैव विष्णोः सायुज्यतां व्रजेत् एतदुद्देशतः प्रोक्तम्
भयद्वादशीफलं एतत्तु एवं पवित्रं च व्रतानामुत्तमं व्रतम् नाधिष्ठायाय प्रदातव्यं न वाभ
क्ताय वै कचित् तु दृढं हि यः पार्थ नरोत्तम हास्माश्रृणोति यो भक्तियुक्तः पठेद्वा विमुक्तपा
पः स निहत्य दुःखं प्रयाति सान्निध्यमनंतमूर्त्तेः इति भविष्योत्तरोक्तमुभये
कादशीव्रतं इयमेवाभयेत्युच्यते गुर्ज्जरे ७ ७ इति श्रीमीमांसकभट्ट

धिनानघ विप्राय दक्षिणां दद्यादच्युतः प्रीयतामिति श्रावणस्यतु मासस्य द्वादश्यां शु-
क्लपक्षतः तत्र पूर्वविधानेन श्रीधरेति जपन्बुधः पूजयेद्देवदेवेशं शंखचक्रगदाधरं
विशेषान्नवनीतं तु तत्र देयं द्विजातये श्रीधरः प्रीयतां मेद्य क्रियं प्रस्मात्वनुत्तमां इत्युक्त्वा
थ कुरुश्रेष्ठ ततो विप्रान्विसर्जयेत् श्रावणस्यैव कृष्णायां द्वादश्यां कुरुनंदन जनार्दनेति
संपूज्य प्रतिमां चक्रपाणिनः ततो विप्रेषु दातव्यं भोजनं सह दक्षिणं जनार्दनः प्रीयतां मे
वाक्यमेतदुदीरयेत् मासि भाद्रपदे भद्र द्वादश्यां शुक्लपक्षतः हृषीकेशेति संचिंत्य तु त
प्रस्खलितादिषु विशेषेणात्र देयं च क्षीरं विप्रेषु पांडव हृषीकेशः प्रीयतां मे वाक्यमेत
दुदीरयेत् कृष्णाप्येवं हि कर्त्तव्या मासि भाद्रपदे नृप उपेंद्रेति च संपूज्य प्रतिमां शार्ङ्गधन्व
नः आश्वयुक् [illegible] पक्षे तु द्वादश्यां नियतः शुचिः पद्मनाभेति नाम्ना वै पूजयेत् प्रतिमां
हरेः विप्रान्संभोजयित्वा च ततो होमस्वशक्तितः प्रीयतां पद्मनाभो मे इति वाचमुदी
रयेत् आश्वयुक्कृष्णपक्षे तु द्वादश्यां भक्तिमान्नरः उपोष्य विधिनानेन हरिमित्यं प्रपू

कृष्णद

वणान्चिता उपवासद्वयसामर्थ्ये उपवासद्वयं कार्यं तदुक्तं भविष्ये एकादशीमुपोष्यैव द्वाद
शीं समुपोषयेत् न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः विधिलोप एकादशीपारण
हानिकृतः उपवासद्वयासमर्थकृतेकादशीव्रतसंकल्पस्य श्रवणद्वादश्युपवासफलत्वे
ऽप्यश्रकामं नित्यस्य बाधकमिति न्यायेन प्राप्तस्य श्रवणद्वादश्युपवासस्य बाधो मात्स्ये
द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि उपोष्यैकादशीं राजन् द्वादशीं पूजयेद्धरिमि
ति नादृशास्याकृतेकादश्युपवासव्रतसंकल्पस्य काम्यं नित्यस्य बाधकमिति न्यायात्प्राप्त
स्य श्रवणद्वादश्यामेवोपवासस्यानुवादे नारदीये उपोष्य द्वादशीं पुण्यां विष्णुर्क्षेण सं
युतां एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयमिति एतद्व्रतपारणं तु पारणा हुउभयान्ते
वृत्तादुभयं तदिति मुख्यः कल्पः तथावस्कांदे तिथिनक्षत्रनियमे तिथिभांते च पारणं अ
तोन्यथा पारणायां व्रतभंगमवाप्नुयात् अन्यतरांते तु कल्पः एतत्तिथिनक्षत्रसं
योगे उपवासोयदा भवेत् पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः नतः पारणकं कुर्या

नीलकंठात्मजभट्टशंकरकृतौ व्रतार्के एकादशीव्रतानि अथ द्वादशीव्रतानि तत्र भाद्रशुक्लद्वा
दश्यां श्रवणद्वादशीव्रतं तच्चैकादशीयुतद्वादश्यां श्रवणद्वादशीव्रतं तच्चैकादशीयुत
श्रवणयोगे कार्यं तथा मात्स्ये द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि स एव वैष्णवो योगो
विष्णुशृंखलसंज्ञितः तस्मिन्नुपोष्य विधिवन्नरः संक्षीणकल्मषः प्राप्नोत्यनुत्तमां सिद्धिं पुनरा
वृत्तिदुर्लभां विष्णुधर्मेपि एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत् तद्विष्णुशृंखलं नाम विष्णु
सायुज्यकृद्भवेदिति तदंते त्रैकादशीद्वादश्योरुपवासः कार्यः यदा श्रवणमेकादशीं संस्पृ
श्य द्वादशीं स्पृशति तदाग्रहशलेत्यु[illegible]क्तं नारदीये संस्पृश्यैकादशीं राजन् द्वादशीं यदि संस्पृ
शेत् श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहतीति यत्तूदयव्यापिनी ग्राह्येत्यो श्रवणद्वादशीव्र
तेइति बृहन्नारदीयवचनं तत्तु वैष्णुः। शृंखलयोगाभावे दिनद्वये च श्रवणयोगे उदयका
ले च परदिन एव तद्योगस्तदा सावकाशमतो नंतद्योगे उपवासविधायकं द्वादश्यां श्रवणा
भावे नारदीये यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् एकादशी तदोपोष्या पापघ्नी श्र

व्र॰
२२१

करणे हेमाद्युदाहृते देशान्यासे कमंकस्तु मांसमैथुनवर्जित इत्यादि वचनैरेकादशीव्रतस्य
त्रिदिनसाध्यत्वावगत्या पूर्वप्रवृत्तद्वादशीव्रतं पुरोडाशवत्प्रसंगीतितंत्रप्रसंगिनो विरो
धे तंत्रिणो बलवत्वेन द्वादश्यामेव पारणं कार्यमित्यपास्तम् अथ कथाग्निपुराणे
मैत्रेय उवाच विधानं शृणु राजेंद्र यथाहृष्टं मनीषिभिः यथोक्तं नियमं कुर्यादेकादश्या
मुपोषितः दंतकाष्ठं प्रगृह्णाथ वाग्यतो नियतेंद्रियः श्रवणद्वादशीयोगे समुपोष्य जना
र्दनं अर्चयित्वा विधानेन त्रयोदश्यां पापरेहनि नदीनां संगमे स्नात्वा यार्चयेद्दत्र वामनं
सौवर्णं वस्त्रसंयुक्तं द्वादशांगुलमुच्छ्रितं पीतवस्त्रैः शुभैर्वेष्ट्य भृंगारं निर्व्रणं नवं हिर
ण्मयेन पात्रेण अर्घ्यपात्रं प्रकल्पयेत् दध्यक्षतफलैश्चैव सहिरण्यं सचंदनं पूजा
भगवत् ततः नमस्ते पद्मनाभाय नमस्ते जलशायिने तुभ्यमर्घ्यं प्रयच्छामि बलिवा
मनरूपिणे नमः कमलकिंजल्कपीतनिर्मलवाससे महाहवरिपुस्कंध घृष्टचक्रा
य चक्रिणे नमः शार्ङ्गासि बाणपाणये वामनाय च यज्ञभुक्फलदात्रे च वामनाय

राम
२२१

देवं वेदविदो विदुः इति नारदीयाभ्यामन्यतरांतस्य संयोगिके व्रते उभयांतं तुल्यत्वमुक्तं त
च्छ्रवणरोहिणीव्रतपारणातिरिक्तपरं याः काश्चित्तिथयः प्रोक्ता नक्षत्रयोगतः ऋक्षां
ते पारणं कुर्याद्विनाश्रवणरोहिणीमिति मदनरत्नधृतवचने श्रवणरोहिण्योः प
र्युदासात् अयं च पर्युदासः श्रवणयोगनिमित्तव्रतपारणयोरुभयांतपदस्य द्यो
तको न त्वेकां [illegible] मात्रे पारणविधायकः पारणाहे श्रवणतो द्वादश्याधिक्ये श्र
वणं वि[illegible]हाय द्वादशीमध्य एव पारणा कार्या तामपेत्य श्रवणाधिक्ये श्रवणं विहा
य त्रयोदशीमध्ये तदुक्तं वह्निपुराणे पारणं तिथिवृद्धौ तु द्वादश्यामुदसंत्यजेत् [?] ई
दृक्षे त्रयोदश्यां तत्र दोषो न विद्यत इति तेन यदा तिथ्यपेक्षया नक्षत्राधिक्यं पारणादिने
भवति तदैकादशीव्रतपारणायां द्वा४ए४दश्यां लंघने दोषाच्छ्रवणद्वादशीव्रतपार
णयास्तूभयांते न्यतरांते वा कर्त्तव्यत्वाद्विरोधप्रसक्तिः तस्यैव सन्यामेकादशीव्रत

नः पुष्कर उवाच या राम श्रवणोपेता द्वादशी महती तु या तस्यामुपोषितः स्नातः पूजयित्वा जनार्द
नं प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशीफलं दध्योदनयुतं तस्यां जलपूर्णं द्विजे घटं वस्त्रसंवेष्टितं द
त्वा छत्रोपानहमेव च न दुर्गतिमवाप्नोति गतिमग्र्यां च विंदति श्रवणं यः स्नानमाप्नोति नात्र
कार्या विचारणा श्रवणद्वादशीयोगे बुधवारो भवेद्यदि अत्यंतमहती नाम द्वादशी सा प्रकी
र्तिता स्नानं जप्यं तथा दानं होमं श्राद्धं सुरार्चनं सर्वमक्षयमाप्नोति तस्यां भृगुकुलोद्वह त
स्मिन्दिने तथा स्नातो यत्र क्वचन संगमे सरिगास्नानजं राम फलं प्राप्नोत्यसंशयं श्रवणे संगमाः
सर्वे परतुष्टिप्रदाः सदा विशेषाद्द्वादशीयुक्ते बुधयुक्ते विशेषतः तथैव द्वादशी प्रोक्ता बुधश्रव
णसंयुता तृतीया च तथा प्रोक्ता सर्वकामफलप्रदा तथा तृतीया धर्मज्ञ तथा पंचदशी शुभा
ब्रह्मवैवर्ते नभस्ये फाल्गुने मासि यदि वा द्वादशी भवेत् बुधश्रवणसंयुक्ता संगमे विजया
स्मृता वारिधानीप्रदानाभिः दध्योदनसमायुतां प्रेतयोनौ न जायेत पूजयित्वा च वामनं
मन्त्रः वंशाः सम्भूतस्तेन सम्भूताः पितरश्चणादसौ नभस्ये संगमे स्नातो वामनो येन पूजितः

नमो नमः देवेश्वराय देवाय देवसंभूतिकारिणे प्रभवे सर्वदेवानां वामनाय नमो नमः म
त्स्यकूर्मवराहाय नरसिंहस्वरूपिणे रामरामाय कृष्णाय वामनाय नमो नमः श्रीधराय
नमस्तेस्तु नमस्ते गरुडध्वज चक्रपाणे नमस्तेस्तु नमस्ते धरणीधर एवं संपूज्य विधिवन्नरः
प्रस्कंदनादिभिः रात्रौ जागरणं कुर्यात्पुरतो जलशायिनः धृत्वा जलमयं रूपं देवदेवस्य च
क्रिणः ब्रह्मांडमुदरे यस्य महद्भूतैरधिष्ठितं मायावी वामनः श्रीमान् सोत्रायातु जगत्पतिः
एवं संपूजयित्वा तं द्वादश्यामुदये रवेः मंगारसहितं तेन ब्राह्मणाय निवेदयेत् वामनः प्रति
गृह्णाति वामनो हं ददामि ते सर्वतोभद्रं द्विजाय प्रतिपादयेत् जलधेनुं तथा दद्यात् छत्रं चै
व तु पादुके सहिरण्यानि वस्त्राणि वृषं धेनुं तथा नृप [illegible] यत्किंचिद्दीयते तत्र तद्दानं स्यादक
ल्यते श्रवणद्वादशीयोगे संपूज्य गरुडध्वजं दत्वा दानं द्विजातिभ्यो वियोगपारणं ततः
सिंहस्य पितेन मार्त्तण्डे श्रवणस्य निशाकरे विष्णुधर्मोत्तरे राम उवाच [illegible] यै
[illegible] ऽपवासासमर्थानां किं स्यादेकमुपोषितं महादेवं ममाचक्ष्व पृच्छ
तत् १

महाफ
लं १

स्नापयित्वा जनार्द्दनं यथाशक्त्या स्वर्णमयं शंखशार्ङ्गविभूषितं स्नापयित्वा विधानेन सितचं
दनचर्चितं सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितं ॐ नमो वासुदेवाय शिरः संपूजयेत्ततः
श्रीधराय मुखं तद्वत् वैकुंठाय हृदि नमः श्रीपतये वक्षं भुजौ सर्वास्त्रधारिणे व्यापकाय नमः
कुक्षिं केशवायोदरं नमः त्रैलोक्यजनकायेति मेढ्रं संपूजयेत्ततः सर्वाधिपतये जंघे पादौ
सर्वात्मने नमः अनेन विधिना राजन्पुष्पधूपैः समर्चयेत् ततस्तस्याग्रतो देयं नैवेद्यं घृत
पाचितं सोदकांश्च नवान्कुंभान् शक्त्या दद्याच्च दक्षिणां एवं संपूज्य गोविंदं जागरं तत्र का
रयेत् प्रभाते विमले स्नात्वा संपूज्य गरुडध्वजं पुष्पधूपादि नैवेद्यैः फलैर्वस्त्रैः सुशोभ
नैः पुष्पांजलिं ततो दत्वा मंत्रमेतमुदीरयेत् नमो नमस्ते गोविंद बुधश्रवणसंज्ञका अ
घौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव अनंतरं ब्राह्मणेनु वेदवेदांगपारगे पुराणज्ञे विशे
षेण विधिवत्संप्रदापयेत् प्रीयतां देवदेवेशो मम नित्यं जनार्द्दनः अनेनैव विधानेन

भविष्योत्तरे युधिष्ठिर उवाच उपवासासमर्थानां सदैव पुरुषोत्तम एकायां द्वादशी पुण्या तां व
द स्वमानघ श्रीकृष्ण उवाच मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता। सर्वकामप्रदा पुण्या
उपवासे महाफला संगमे सरितां स्नात्वा द्वादशीं समुपोषितः समग्रं समवाप्नोति द्वादश द्वादशी
फलं साधयेत् द्वादशी ज्ञेया न स्याद्भाद्रपदादृते दशम्येकादशी यत्र नो पोष्या सा भवेत्तिथिः श्रव
णेन तु संयुक्ता सा शुभा सर्वकामदा पारणं तिथिवृद्धौ तु द्वादश्यामिंदुसंक्षयात् वृद्धौ कुर्यात्त्र
योदश्यां न तत्र दोषो विद्यते इत्येवाकथिता राजन् द्वादश्यां श्रवणे मया कर्त्तव्या सा प्रयत्नेन ह
लामत्र फलप्रदा इति हेमाद्रौ श्रवणद्वादशीव्रते विष्णुरहस्ये द्वादश्यामुपवासोत्र त्रयोद
श्यां तु पारणं निषिद्धमपि कर्त्तव्यमित्याज्ञा पारमेश्वरी तथा बुधश्रवणसंयुक्ता सैव चेद्द्वाद॰
शी भवेत् अतीतसंख्या सर्वकृतमिहाक्षयं द्वादशी श्रवणोपेता यदा भवति भारत संगमे स
रितां स्नात्वा गंगादिस्नानजं फलं सोपवासः समाप्नोति नात्र कार्या विचारणा जलपूर्णं त
दा कुंभे स्थापयित्वा विचक्षणः पंचरत्नसमोपेतं सोपवीतं सुचर्चितं तस्य स्कंधे सुघटितं

वमहनी ३

श्वेतान्ददर्शसोतत्राव्याकुलितेंद्रियः स्नायुबद्धास्थिचरणान्धावमानानितस्ततः श्वेतस्कंध
समारूढमेकंविकृतदर्शनं ददर्शबहुभिःश्वेतैः समंतात्परिवारितं आगच्छन्तं शावमदीम
स्तुतिपाठपुरःसरं श्वेतस्कंधान्महींगत्वा तस्यांतिकमुपागमत् सोपिवाचावणिक्श्रे
ष्ठमिदंवचनमब्रवीत् अस्मिन्घोरतरेदेशेप्रवेशोभवतःकथं उवाचवणिजंधीमान्सा
धैर्यमुपगतोवणिः प्रवेशोदैवयोगेनकर्मकृतेनतु तवाप्यमेवाधतेत्यर्थं तदेतं चमप्रेत
या प्राणाःकंठमनुप्राप्तावचनंनवदतीवमे अत्रोपायंनपश्यामिजीवितंयेनकेनचि
त् श्रीकृष्णउवाच कृतातिथ्योमयापश्चाद्भ्रमिष्यामियथासुखं एवमुक्तस्तथाचक्रे
सवणिकृत्यथाह्निकः मध्याह्नसमयेप्राप्तेनतस्तंदेशमागतः पुन्नागवृक्षाच्छीतोदवा
रिधानीमनोरमा दध्योदनस्यभक्तेनवर्धमानेनसंयुता अवतीर्यततःसोग्रेददावति
थयेसदा तेषामामंत्रणेवणिक्परांतृप्तिमुपागतः वितृष्णोविज्वरश्चैवदत्तेनेनसम
पद्यन्ततस्तुश्वेतस्संयस्यतस्माद्भागंक्रमाहृदे दध्योदनात्सपानीयाच्छ्वेतास्तृप्तिंपरा
इत्येवमुक्तःश्वेतस्तुवणिग्वतंवाक्यमब्रवीत् पुन्नागमिमं आश्रित्यपश्यतीदृश्यमुहूर्तकम् ×५

न थ्रांसुग्रीवानरोत्तमः सर्वं निर्वर्तयेत्सम्यगेकभक्तरतोपि सन् श्रीकृष्ण उवाच अत्राप्युदाह
रंतीममितिहासं पुरातनं महत्यरण्ये यद्वृत्तं भूमिपाल शृणुष्व तत् देशो दशार्णको नाम
तस्य भागे तु पश्चिमे आसीद्वासीन्मरुर्देशः सर्वसत्वभयंकरः सुवप्रसिकताभूमिर्यत्र कृष्णा
महोरगाः अल्पछायद्रुमाकीर्णो मृगव्याघ्रसमाकुलः शमीखदिरपालाशकरीरासपीलु
भिः तत्र भीमद्रुमाः पार्श्वकंटकैरावृता दृढाः गंधव्याघ्रगणाकीर्णो न भूर्दृश्यते क्वचित्
अनर्कतापविषमाभीषणाः पुरुषाः खराः ज्वलिताग्निसमं चैव यत्किंचित्तत्र दृश्यते तथा
पिजीवाज्जीवंति सर्वे कर्मनिबंधनाः नोदकं नो तृषाभोमा राजंस्तत्र बलाहकाः कदाचि
दपि दृश्यंते प्लवमाना विहंगमाः संक्रांताऽगतैः कैश्चित्क्षुधाभिस्तृषितैः समं सैकतेष्वेव
न शंपति जलैः सैकतसेतुबन्न तस्मिन्तथाविधे देशे कश्चिद्दैववशागतस्व [illegible]ा निजनसा
र्थपरिभ्रष्टः प्रविष्टो मरुजांगले दृष्टवान्मलिनान्यतान्तिमांसान्भीमदर्शनान् बभ्रा
मोद्भ्रान्तहृदयः तृष्णयाक्रमकर्षितः क्व ग्रामः क्व जनैः क्वाहं यास्यामि वद्धीराव अथ

रि
मि
के

व्र०
२२५

मनोहरे नतीर्थवरमासाद्य प्रतिवेश्यस्तु मे द्विजः अवलाद्वादशीयोगे स्नात स्रोवनमार्गे पितः
चांद्रभागस्य तोयस्य वारिधान्योन वा हृष्टः दध्योदनयुतैः सार्द्धं संपूर्णैर्वर्द्धमानकैः छत्रो
पानद्युगं वस्त्रं प्रतिमां विधिवद्धरेः ददद्दो विप्रमुख्याय रहस्यज्ञो महामुनिः वित्तसंव
त्सराणां पीयतस्यापि च ततो मया सोपवासेन दत्ता वै वारिधानी सुशोभना चंद्रभागस्य
विप्राय दध्योदनयुता तदा एतत्कृत्वा गृहं प्राप्य ततः कालेन केनचित् पंचत्वमहमा
सादयं नास्तिक्यात् प्रेततां गतः अस्मां महाट्व्यां घोरायां यथा दृष्टस्त्वयानघ ब्रह्मस्वहारि
णस्त्वेते मृताः प्रेतत्वमागताः परदाररताः केचित्स्वामिद्रोहरताः परे मित्रद्रोह
रताः केचिदेतस्मिन्सुदारुणे ममैते भृत्यतां याताः अन्नदानकृतेनघ अदत्त यो भ
गवान्विष्णुः परमात्मा सनातनः यद्दीयते न मद्दिश्य अक्षय्यं तत्प्रकीर्तितं मया विहि
ताः किं चैते वने स्मिन् सुदारुणे पीडामनुभविष्यति दारुणां कर्मयोनिजां एते यांत
महाभागमम आनुग्रहकाम्यया अनेकनाममगोत्राणि गृह्णीयास्त्वं रविलेन च अस्ति

राम
२२५

गताः अतिथिं तर्पयित्वा च प्रेतलोकं च सर्वशः ततः स्वयं च वुभुजे भुक्त्वा प्रोक्तं यथा सुखं त
स्य भुक्तवतस्त्वन्नपानीयं वर्द्धतयं प्रियौ प्रेताधिपं ततस्तुष्टो वणिग्वचनमब्रवीत् आश्च
र्य्यमेतत्परमं वनेस्मिन् प्रतिभाति मे अन्नपानस्य संप्राप्तिः परमस्य कृतस्तव स्तोकेनैव
तथान्नेन विभर्षि सुबहून् पृथक् तृप्तिं गताः कथं त्वेते निर्मांसास्थिकृतयः अपरं च क
प्रावा ५ थं स्नेहमवापिपासितः पं हिंसा वत्तं च कस्मात्त्वं संप्राप्तो निर्जले वने तत् त्वं श्रासि कथं ग्रासमा
त्रेणैवं वृभुं ब्रवीत् शृणु भद्र प्रवक्ष्यामि दुष्कृतं कर्म चात्मनः शाकलेन गरे रम्ये अहं
मासं सुदुर्मतिः वणिग्मासं पुरा कालेन नतो भद्र मम मानघ शाकलेन गरे रम्ये नास्तिकस्य
दुरात्मनः धनलोभात्तथा तत्र कदाचिन्मम देहिना न दत्ताभिदत्तवोभिदातान् यायां तु कदा
चन प्रतिवेश्यस्तु तत्रासीद्ब्राह्मणो गुणवान्मम श्रवणं द्वादशीयोगे मासि भाद्रपदे
तथा स कदाचिन्मया सार्द्धं तापीनाम नदीयया तस्यास्तु संगमः पुण्यो यत्रासौ चंद्र
भागया चंद्रभागा सोमसुता तापी चैवार्कनंदिनी तयोः शीतोदसलिले संगमे सु

साद्यवर्णाश्चहात्मा सुप्रहृष्टांतंनंदभूषितांगः कल्पसमग्रंसुरसुंदरीभिः स्वर्गेसुरेमेऽदितिःस
तांवर श्रुत्वाविष्णुस्तदावाक्यंदेवानांकरुणोदयं उवाचवाक्यंवाक्यज्ञोदेवानांहितका
म्यया जातेवैरोचनेपुत्रंबलिंत्रैलोक्यशंकितं तपसाभावितात्मानंक्षांतंदांतंजितेंद्रियं
मद्भक्तंमद्गतप्राणंसत्यसंधंमहाबलं प्रजापतिसमंस्वात्मप्रजानांप्रियकारकं नग्रणास्त
स्यप्राक्रमंतेनवक्तुंकेनापिभूतले अवश्यंतपसोपेतैर्भोक्तव्यंतपसःफलं तपःक्षयेणास्तुबहुना
कालेनास्यभविष्यति यदाविजयदंदेवंत्वास्येकालेनकेनचित् समाहृत्याप्रियंतस्यत
दादास्यदिवौकसां अदितिर्मेप्रयत्नाद्वैपुत्रार्थेपुत्रगृध्नुनी तस्मात्मनीषितंदेवकार्यंविष्णु
रचिंतयत् सचिंतयित्वासुचिरंदेव्यागर्भेऽवधारणं अदितिर्वरयामासवांछितंतेभवि
ष्यति अथकालेबहुतिथेगतेसागर्भिणीभवत् सुषुवेनवमेमासिपुत्रंसावामनंहरिं
ह्रस्वपादंह्रस्वकायंमहाशिरसमर्कभं पाणिपादोदरकृशंह्रस्वजंघेद्धकेशं दृष्ट्वातुवा

कस्तां गतो वैवनत्वसंपुटिकाहृमा हिमवंतमथासाद्य तत्र त्वंलब्धसंनिधिं गयाशीर्षं ततो
गत्वा श्राद्धं कुरु महामते एकमेकमथोद्दिश्य प्रेतेप्रेते यथासुखं एवं समाप्य मासार्द्धेन
प्रेतानां च नदप्रभाः समारुह्य विमानेसौ स्वर्गलोकमितो गतः स्वर्गते प्रेतनाथेन प्रभावा
त्स वणिक्कुमारक नाम गोत्राणि संगृह्य प्रयातः सहिमाचलम् तत्र प्राप्य निधिं गत्वा वि
निक्षिप्य स्वके गृहे धनभागमुपादाय गयाशीर्षवटं ययौ प्रेतानां क्रमशस्तत्र चक्रे श्रा
द्धं दिने दिने यस्य यस्य यथा श्राद्धं स करोति दिने वणिक् स स तस्य तदा स्वप्ने दर्शयत्यात्म
नस्तनुं ब्रवीति च महाभाग प्रसादेन तवानघ प्रेतभावं विमुंच्य त्यक्त्वा प्राप्तो स्मि परमां गतिं
स कृत्वा धनलोभेन प्रेतानां स क्रतिं वणिक् जगाम स्वगृहं तत्र मासि भाद्रे युधिष्ठिर चका
र विधिवच्छ्राद्धं ततो दिष्टान्तमागतः अवाप परमं स्थानं दुर्लभं सर्वमानवैः यत्र कामफ
ला वृक्षा नद्यः पायसकर्दमाः शीतलामलपानीयाः पुष्करिण्यो मनोरमाः तं देशमा॰

वृ०
२२७

रा: देवेनो ह्यागता देवा प्रहृष्टाः पूज्य वामनं देवः कृत्वा जगत्कार्यं तत्रैवांतरधीयत एतत्सर्वंस
मभवदेकादश्यां नराधिप तेनेष्टा देवदेवस्य सर्वदा विजया तिथिः एवं हि फाल्गुने मासि पुष्ये
ण सहिता नृप विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा एकादश्यां सोपवासो रात्रौ संपूज
येद्धरिं सौवर्णे पात्रे वा दारुवंशमयेपि वा सौवर्णं वामनं कुर्यात्स्ववित्तस्यानुसारतः
शिखी कमंडलुधरः छत्री यज्ञोपवीतवान् एवं लक्षणसंपन्नं वामनं पूजयेद्धरिम् ग्राह्य
र्घपात्रं वा हेमरहितैः फलसंयुतैः मार्गेणानेन मंत्रेण दापयेत्तया तिलाढकेन संपूर्णेन
स्थनकुडवेन च जलाभे यवगोधूमैः फलैः शुक्लतिलैर्भवेत् पुष्पैर्गंधैः फलैर्धूपैः कालोत्थै
र्दीपैर्यजेद्धरिम् नानाविधैरन्नैर्नैवेद्यैर्भक्ष्यभोज्यैर्गुडोदनैः स्वस्य वित्तानुसारेण सहिरण्यं च का
रयेत् एभिर्मंत्रपदैस्तत्र पूजयेद्गरुडध्वजं उपहारैर्नरश्रेष्ठ शुचिर्भूत्वा समाहितः प्रपाते
यमविष्णवे योः पूजा ध्यात्वा जलमयं देवं देवदेवस्य चक्रिणः अलं नुदरे चास्य महद्भूते
रधिष्ठितं मायावी वामनः श्रीशः समायातु जगत्पतिः आवाहनं पूजनाय महेशाय

ए०वर्म४

राम
२२७

मनंजातमदितेर्मोदनं ततथा भयं च सर्वदैत्यानां देवतास्तोषमागमन् ॥ तकादीन्शुभकर्म
संस्कारान्स्वयमेवह चकार कश्यपो धीमान्प्रजापतिसमन्वितः आबद्धमेखलो दंडी जटीय
ज्ञोपवीतवान् कृष्णचर्माजिनधरः कमंडलुविभूषितः बलेर्बलवतो यज्ञं जगाम बहुविस्तरं
दृष्ट्वा दैत्यबलं सर्वं वामनोभ्येत्य तत्क्षणं अर्थीन हे यज्ञपते दीयतां मम मेदिनी पदत्रयप्रमा
णेन पठनार्थं स्थितो ह्यहं इत्यादत्तानवं तथा बलिः प्राह द्विजोत्तमं ततो वर्द्धितुमारब्धो वाम
नोनंतविक्रमः पादौ भूमौ प्रतिष्ठाप्य शिरसा व्याप्य रोदसी नाभ्यां स्वर्गादिकौ लोकान्ल
लाटे ब्रह्मणः पदं ततस्तृतीयपदं लेभे जनो ने दुर्दिवौकसः तं दृष्ट्वा महदाश्चर्यं सिद्धा देवर्ष
यस्तथा साधु साध्विति देवेशं प्रशशंसुः मुदान्विताः ततो दैत्यगणान्सर्वान्हत्वा त्रिभुव
नं वशी बलिं प्राह च भोगच्छ पातालं स्वबलानुगः तत्र त्वमीप्सितान्भोगान्भुंक्ष्व मत्कृपा
लितः अस्मिंदूष्यावसाने तु त्वमेवेंद्रो भविष्यसि एवमुक्तो बलिः प्रायान्नमस्कृत्य नरो
त्तमं विसृज्य च बलिं देवो लोकपालान्उवाच ह स्वानि धिष्ण्यानि गच्छध्वं तिष्ठध्वं विगतज्व

व्र०
२२८

एतां अन्नं चतुर्विधं स्वादुरसैः षड्भिः समन्वितं मया निवेदितं देव प्रसीद परमेश्वर अग्नि
यमौ वैश्रवणः पापं मे हंतुमव्ययं जगत्सृज्यो जगद्वंद्यः अनादिर्जगदंतकृत् जलशा
यी जगद्योनिः प्रीयतां मे जनार्द्दनः अनेककर्मनिर्बंधध्वंसिनं जलशायिनं नतोऽस्मि
मथुरावासं माधवं मधुसूदनं नमो वामनरूपाय नमस्तेस्तु त्रिविक्रम नमस्ते बलि
बंधाय वासुदेव नमोस्तु ते नमो नमस्ते गोविंद मन्नेशा त्रिविक्रम पापस्य संक्षयं कृ
त्वा सर्वकामप्रदो भव सर्वगः सर्वदेवेशः श्रीधरः श्रीनिकेतनः विश्वेश्वराय विश्व
वे श्रीशाय च नमो नमः सर्वं संपूजयेद्रात्रौ एकादश्यां नरोत्तम जागरं तत्र कुर्वीत गी
त वादित्र मंगलैः एवं पूर्वोक्त विधिना अर्चयेद्वामनं हरिं प्रदद्यात् द्विजश्रेष्ठो विदुषि ब्रा
ह्मणे मंत्रतो नृप वामनो हि ददौ दाता द्रव्यस्थो वामनः स्वयं वामनोऽस्य प्रतिग्रा
ही वामनाय नमो नमः मंत्रेणानेन गृह्णीयात् ब्राह्मणाश्चापि मं[illegible] वित् वामनः प्रति

ग

राम
२२८

जलजास्त्रायशंखिने नमस्ते केशवानंत वासुदेव नमोस्तु ते स्नानं मलयेषु पर्वतस्थं गंधपुष्पम
नोहरं मयानिवेदितं तुभ्यं गृहाण पुरुषोत्तम पुष्पं नमः कमलकिंजल्कपीतनिर्मलवास
से महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे पूजामंत्रः मत्स्यं कूर्मं वराहं च नारसिंहं च वा
मनं रामं रामं च कृष्णं च बुद्धं च यामिहितेनमः पादाद्येकैकमेस्यांगपूजये एवमंत
तः पादे मत्स्याय च नमो नमः कूर्माय जानुनी वराहाय नमो गुह्यं च नरसिंहायेति नाभितः
उरस्तु वामनायेति भुजौ रामाय वै नमः मुखं रामाय च नमः कृष्णाय च नमः शिरः ए
वं कृते व्रते ब्रह्मन् यत्पुण्यं तन्निबोध मे यावत्कल्पशतं पूर्णं एकविंशतिसंख्यया ज्ञा-
प्य विष्णुपुरं भोगान् भुंजते कालमक्षयं इहागत्य भवेद्राजा राजाभिः परिसेवितः सर्वा
गपूजां धूपोयं देवदेवेश शंखचक्रगदाधर अच्युतानंत गोविंद वासुदेव नमोस्तु ते धू
पः त्वमेव पृथिवी ज्योतिर्वायुराकाशमेव च त्वमेव ज्योतिषां ज्योतिर्दीपोयं प्रतिगृ-

रूपति सौभाग्यं चैव मतुल्यं प्राप्यते कस्य केशव नानान् तन्मे कथय देवेश परमाभीष्टदायकं ईश्व
र उवाच श्रूयतां परमं गुह्यं व्रतं पापहरं शुभं सुरूपा द्वादशी नाम महापातकनाशिनी सु
रूपदायिनी चैव महापातकनाशिनी कुलवृद्धिकरी चैव सर्वसौख्यप्रदायिनी तच्छृणुष्व
प्रयत्नेन कथ्यमानं मयानघ पुरा वै द्वापरस्यांते विष्णुर्दैत्यनिषूदनः अवतीर्णो मर्त्यलो
टी: के वसुदेवकुले किल तेनोढा रुक्मिणी नाम भीष्मकस्य सुता परा अत्यंतरूपशुभगा प
तिव्रतपरायणा न हि तस्य विना कृष्णं लोके कश्चिद् दहते सुखं श्वश्रू श्वशुरयोश्चापि पादवंद
नतत्परा केनापि कर्मदोषेण कुपिता विष्णुमातरं न प्रसादयति दित्रमितिस्तावात् दे
वकी कृष्णं प्रोवाच कुपिता यदि ते जननी ह्यहं ततस्त्वया हि वैवाच्याकुलरूपगुणाधिका
महाकुलमन्यथा कर्त्तुं नार्हसि त्वं कुलोद्वह श्रीकृष्ण उवाच अपापा रुक्मिणी त्यक्ता उद्व
हेयं कथं शुभा यः पतिस्त्यजते भार्यां सविप्रवरदेहिनां स प्राप्नोति हि मंदत्वं दौर्भाग्यं स
प्तपोरूपं विरूपत्वमवाप्नोति न सुखं विंदते क्वचित् व्याधिवान्त [illegible] त्रैलोके निंदनीयः

गृह्णाति वामनो वै ददाति च वामनस्तारकोभाभ्यां वामनाय नमो नमः । ते प्रतिग्रहमंत्रः ए
वं दत्वा ततः स्नातभोजनं पृषदाज्यकं पूर्वं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुंजीत चात्मवान् भूयोय
थेच्छया राजन्सर्वत्रैषविधिः स्मृतः एवं व्रते कृते ब्रह्मन्नूयत्पुण्यं तन्निबोध मे हस्त्यश्वर
थवाजीनां दाता भोक्ता विमत्सरी रूपसौभाग्यसंपन्नो दीर्घायुर्नीतिगो भवेत् पुत्रैः प
रिवृतो जीवेत्संवत्सरशतं प्लातं राधाव्युष्टिः समाख्याता एकादश्यां मयानघ पूर्वमेव समा
ख्याता द्वादशी श्रवणान्विता व्युष्टिः फलं उपोष्यैकादशीं पश्चाद्द्वादशीमप्युपोषयेत्
नचात्र विधिलोपः स्यादुभयोर्देवता हरिः बुधश्रवणसंयुक्ता द्वादशी संगमोदकं दानंद
ध्योदनः सम्यगुपवासपरो विधिः सगरेण ककुत्स्थेन धुंधुमारेण गाधिना एतैश्चा
न्यैश्च राजेन्द्रैः कृता वै द्वादशी तिथिः इति भविष्योत्तरपुराणे वामनजयंती अथ पौष
कृष्णद्वादश्यां गुर्जराचारप्रसिद्धं सुरूपाद्वादशीव्रतं उमोवाच भगवन्सृष्टिमिध्यामि प्रसा
दं कुरुष्वे प्रभो कथितं त्वत्प्रसादेन यद्यास्ति मयि सौहृदं व्रतेन केन चीर्णेन विरूपत्वं प्रणा॰

न

पौत्रैः

विरूपाभवद्दृष्टे किं न ज्ञातो ह्यहं त्वया इत्युक्त्वा सा तया देव्या यथा शक्त्या प्रसादितः प्रस
न्नोऽजगद्देवा कस्मच्छापो नान्यथा भवेत् जन्मांतरेणास्य फलं करिष्यति विरूपतां तेन म
न्त्येवतीर्णा हि गोपकस्य गृहे शुभा सत्यभामा विरूपं दर्शनीत्वथ कर्णनासातिविकृता
संजाता तत्प्रभावतः पाणिपादकरिग्रीवा सर्ववैरूप्यलक्षणा तत्र गर्ध महाप्राप्त सा ते
कन्यां प्रदास्यति श्रीकृष्ण उवाच भगवन् विरूपवदनां कथं दत्त्वामि नित्यशः कां गतिं
च गमिष्यामि तां विवाह्य कुरूपिणीं नारद उवाच तस्याः शापप्रसादेन हे रुक्मिण्यायऽ
नंदन उत्तमं प्राप्स्यते रूपं सौभाग्यं परमं सुखं माता पिता ह्याकिल वै धर्मकामार्थसिद्ध
ति एवं भविष्यतीत्येव संबंधो जिंतः सुरैः त्वया च नान्यथा कार्यं गुरूणां वचनं महत्
माता गुरुतरा भूमावितिवेदेषु पठ्यते ईश्वर उवाच एवमुक्त्वा महादेवि नारदस्त्रिदिवं
गतः कृष्णोऽपि मातरं प्राह वैवाह्यं विधीयतां विवाहिता च सा तेन वेदोक्तविधिना ततः
स्वानीय स्वगृहं मातुः दर्शयामास तां वधूं पश्यापाद्य वदनं भामापः [illegible] ताश्च चिंतिता नि

हि २

सदेहिनां इत्यहं जानमानोपि कथं कुर्यां वदस्व त्वं देवकुवाच सर्वेषां च वेदानां तीर्थादी
नामपि ध्रुवं माता गुरुतरा पुत्रकस्य सा वचनं त्यजेत् मम वाक्यस्य कैरणे कथं पापिष्टता
भवेत् जननी पूज्यते तेन भार्या च यदुनंदन श्रीकृष्ण उवाच परित्यजामि नाहं तां प्रियां प्रा
णधनेश्वरी इति तस्यौ परां भूत्वा मातरं प्रेक्ष्य केशवः चिंतयामास परमं कथं सौख्यं भवेदि
ति रातास्मिन्नेव काले तु नारदो भगवानृषिः आजगाम सहसा विष्णुं संप्रेक्ष्य विस्मितं
पूजितः परया भक्त्या अर्घ्यं जग्राह नारदः उपविष्टो यथान्यायं पर्यपृच्छदनामयं नारद उवा
च किं च खेदं करोषि त्वं कथम् उद्वेगकारणं किं न स्त्विय ति ते भीष्टं त्यजोद्वेगं यदूत्तम श्री
कृष्ण उवाच श्रूयतामभिधास्यामि पूर्ववृत्तांतमादरात् लक्ष्मीयुक्तः पुरा नाथः क्रीडमा
नो हि नंदने तत्रागतः स भगवान् दुर्वासा ऋषिसत्तमः सत्कृतस्तु यथाज्ञानं मम तुष्टया
न पूर्वकं प्रेक्ष्य वीभत्सरूपं तं देव्या हास्यं कृतं तदा स कोपेन महातेजा वैश्वानरसमप्रभः
शशाप लक्ष्मीं दुर्वासा मुनिः क्रोधेन संयुतः हसितोहं त्वया मूर्ध्ने आत्मनो रूपमीदृशं तु
मात्रा नियुक्तौ ब्रह्मर्षे परिणेत्र द्विजोत्तम। कन्यामुद्वाहयिष्यामि कुरूपां कस्यचित्प्रभो।
नारद उवाच ४४

ढाँ रु१

कृ०
२३१

नःपप्रच्छ कृष्णं सा प्रणिपातेन वैष्णा देव कृष्णाभिचैवोक्तं नरू अपि प्रभो मम कथं पश्यामि ता
मधनवो कृष्णवल्लभां कृष्णस्तूवाच ग्रंथाद्रत्यतितेशुभ्रु विरूपां तां सुमध्यमां विरूपत्व
वर्णा दीनां कुरूपां विकृताननां अहद्यवे चित्रकृतं रूपाद्यत्र न संशयः प्रार्थयाद्य श्रियं
सुभ्रु सुरूपां दर्शीवृतं तिलादपि हि षष्ठांशं देहि मे सेविकास्म्यहं सागतातत्सकाशात्तपि
धाय द्वारमादरात् उवाच रुक्मिणीं सात्र सत्यभामा मा प्रवृता एका मघ्याकृतिं देहि देहि
मीष्मकनंदिनि अकृतिः अदेयाघयद्यस्मिमयसोहृदं रुक्मिण्युवाच कोयं मतिमे
मस्ते धसुरूपां दर्शीप्रति तिलाकृतिं प्रयच्छामि उद्घाटय कपाटकम् इत्युक्त्वा त्वरि
तस्लात्वा हृयेकां तिलाकृतिं तस्यां चैव प्रदत्तायां रूपेण साधिकाभवत् तां दृष्ट्वा विस्म
यपरां पप्रच्छपिता हे कथं तां मम का हि त्वं किमर्थमिहवागता सत्यभामोवाच
नवाहंम गिनी भद्रे कृष्णेनोढासि धार्मिके सत्यभामेति मे नामास्मि चरणौ तव

राम
२३१

दत्वा

द दृः

मनी २

इतिपरमांगणिष्ठप्रसादपरमामव इत्युक्त्वातीद्यतां कृष्णः प्रणिपत्यच मंदिरं जगामकृतकार्यो
णांकारणायमहाबलः तांदृष्ट्वादेवमाताचवमेोदुःखाधिकर्षिता ईदृग्विरूपाविकृताकथं
मनोस्मिगोपिता चिंतामवापमहतींचोद्विग्नमानसा कस्यापिनाचचदेया विरूपंतं शरी
रीरजं अथकस्मिंश्चित्कालेतु रुक्मिणीत्रभा वतः नमस्कृत्यततः श्वश्रूं संदृष्ट्वा गोप्यं
तदा उवाचप्रसन्नवाक्यंभक्तियुक्तंशुभावहं अंबाहंद्रष्टुमिच्छामिसपत्नींकृष्णवल्लभां
तांदर्शयामासरुक्मिणींसुप्रसादंविधीयतां देवकुवाच श्वश्रूरहंतेसुभगेममापि वच
नंकुरु पूर्वमाचरितंसुभ्रुसुरूपाद्वादशीव्रतं संप्रयच्छसिचेत्तस्यैदर्शनंतेभविष्यति
रुक्मिण्युवाच कष्टेनक्रियतेधर्मः व्रतंचापिसुदुष्करं कथंतस्यैप्रयच्छामिफलंदे
वैःसुदुर्लभं देवकुवाच अर्द्धंप्रदीयतामस्यैतदर्द्धमथवापुनः पंचमांशमथोवा
स्तुं षोडशांशमथापिवा रुक्मिण्युवाच सुरूपाद्वादशीपुण्यंतिलार्द्धमपिनोत्सहे किं
पुनःषोडशांशंतुसपत्न्याःदुःखचेतसि एवमुक्त्वाजगामाशुमंदिरंमामभेदतएणो पु

नू २
सू ४

व्र०
२३२

होमयाहुतीन् घृतमध्वाधिकं चैव तिलान् व्याहृतिसंयुतान् सहस्रशीर्षेति मंत्रेण हृदि
ध्यात्वा जनार्दनम् लक्ष्मीयुक्तं च मेघाभं शंखचक्रगदाधरं होमांते कारयेच्छ्रद्धं वैष्ण
वं द्विजसत्तमैः दत्वा च भोजनं तेभ्यः कृतकुंडं च दक्षिणां धर्मश्रवणसंयुक्तं जागरयान्नततो
निशां तत्कुलं वै स्वर्णमूर्त्तिं विप्राय प्रतिपादयेत् तत्रहीनं विधिहीनं सर्वं तत्र क्षमापयेत्
ईश्वर उवाच एवं यः कुरुते देवि सुरूपाद्वादशीव्रतम् नरो वा यदि वा नारी तस्य पुण्यं प्रशृणु
ष्व मे दौर्भाग्यं नश्यते तस्य त्रिपिडजन्मांतरार्जितम् अपि धूम्रसंपक्वो जायते कारणं
नरान् तस्यापि नश्यते दुःखं वै रूपं यं तस्य जन्मनि बंधुभिर्न वियोगं च नेष्टैः सह वियोगता
जायते गोत्रवृद्धिश्च कीर्त्तिमान् जायते भुवि जातिस्मरत्वमाप्नोति पदं निर्वाणमाप्नुयात्
पठ्यमानमिदं भक्त्या यः शृणोति समाहितः पुण्यमाप्नोति सततं स्वर्गलोके महीयते
इति सुरूपाद्वादशीव्रतं इति भट्टनीलकंठात्मजभट्टशंकरकृते व्रतार्के द्वादशीव्रतानि
द्वीप

राम
२३२

१२ कर्मणा ... कर्तव्या वि... ारंवद स्वमे नियमं होमदा
न च प्रसादं सखि धीय... इत्युवाच ३

इति श्रुत्वा तु वचनं विस्मयोत्फुल्ललोचना देवाच किल चार्वंगी भ...य विस्मिताभवत्
एतस्मिन्नेव काले तु वाग्वाचा श्रीः शिरणी तद्वदानप्रभावेण सत्यव्रतपरायणा सुरूपा
द्वादशी पुण्या देवानामपि दुर्लभा देव्युवाच पौषे मासि तु संप्राप्ते पुष्यर्क्षे तु यदा भवेत् त
स्यां रात्रौ यतात्मानो ध्यात्वा विष्णुं सनातनं श्वेतां गौरकवर्णा वा तस्या ग्राह्यं तु गोम
यं अंतरिक्षात्पतितं शुचि भूमौ न म वास्थितः तस्य कृत्वाकृतीनां शतमष्टोत्तरं तिलैः
प्रतीते द्वादशी कृत्वा उपवासपरायणैः स्नात्वा नद्यां तडागे वा विष्णुमेवाथ चिंतयेत् सौ
वर्णं तु हरिं कृत्वा रौप्यं वा भक्तिशक्तितः तिलपात्रोपरि स्थाप्य च ततो विष्णुं प्रपूजयेत् इ
ति संपूज्य विहितं पुष्पैर्धूपैस्तु धूपितैः नैवेद्यं तिलमिश्रं तु फलानि विविधानि च न
मः परमशांताय विरूपाक्ष नमोस्तु ते सर्वसंकष्टनाशाय गृहाणार्घं नमोस्तु ते
अर्घमंत्रः एवं संपूज्य देवेशं कुर्याद्धोमं समाहितः आवाह्य देवीं लक्ष्मीं प्रां होमये

लयेर्वापि तथा ब्राह्मण वेश्मनि स्थापयेद्वेदमंत्रेण प्रतिष्ठां तत्र कारयेत् तद्दिने दन्तका
ष्ठं तु पूर्विकां च वरानने स्नानशुद्धिं ततः कृत्वा ततः पूजां प्रकल्पयेत् ऋषिभिः सहसप्त
केः पूजां कृत्वा पृथक्पृथक् कुंकुमागरुकस्तूरीसिंदूरैरष्टगंधकेः चंपकैः शतपत्रैश्च
यूथिकादिस्तु पुष्पैः श्रीवासूत्रेण दूर्वया पूजयित्वा विधानतः अर्घेण चातिशुभ्रेण उत्त
रीयकृत्वा श्रीफलद्राक्षादाडिमैः तथा जातीफलेन च अर्घ्या दवीचप्रा वैरणि शंकरस्य
सदाप्रिये अर्घं गृहाण देवेशि मम सोपरि कृपां कुरु इति पूजां प्रकर्त्तव्या कथां चक्रे द्विजोत्त
मः श्रीलक्ष्मीरुवाच अद्भुतायनमस्तुभ्यं परब्रह्मायादिरूपिणे व्रताध्यक्ष महाशास्त लंब
क्षिदायकारक कथयस्व प्रसादेन व्रतानामुत्तमं व्रतम् केन चादौ पुराचीर्णमर्त्यलोके
च कारितं एतत्सर्वं प्रयत्नेन ब्रूहि मे तु जगदीश्वर भगवानुवाच शृणु तातः संप्रवक्ष्यामि पा
र्वत्याश्च कथामिमां यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः अस्ति पुराकृतयुगे कोऽ

अथ त्रयोदशीव्रतानि तत्राषाढशुक्लत्रयोदश्यादितद्यापार्वतीव्रतं[illegible]कथोत्तरे लक्ष्मीरुवा
च देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक कथयस्व प्रसादेन लोकानां हितकाम्यया नारी
णांतु व्रतं चैव अवैधव्यकरं शुभं येन चीर्णेन नारीणाम खंडफलदो भवेत् श्रीभगवानु
वाच सत्यमुक्तं त्वया देवि न हि मिथ्या त्वयोदितं तद्व्रतं कथयिष्यामि नाख्यातं कस्यचित्पु
रा अकथ्यं परमं गुह्यं पवित्रं पापनाशनम् येन चीर्णेन नारीणामवैधव्यं च जायते आषा
ढे चैव कर्त्तव्यं शुक्लपक्षे त्रयोदशी गृहीयान्नियमं तत्र दन्तधावनपूर्वकं दन्तधावन
मंत्रः आयुर्वलं यशो वर्च्चः प्रजां पशुवसूनि च ब्रह्मप्रज्ञां च मेधां च त्वन्नो धेहि वनस्पते
नियमात्फलमाप्नोति निःफलं नियमं विना एतत्सर्वप्रयत्नेन व्रतं नियमपूर्वकं ए
कभक्तव्रतं चैव करिष्ये च मयाधुना स्वादुरहितेन धान्येन तेन पापं व्यपोहतु उमामहे
श्वरौ कार्यौ सुवर्णरजतादिभिः अथवा मृण्मयौ कार्यौ सिंहदेवोपरिस्थितौ गोष्ठ देवा

दिशश्च वाहान्विश्रामयेत्यश्च रथात्तीर्थ्यिदंपत्याचाश्रमं च गतौ मुनेः सायंकाले संध्यायां दि

वृ० २३८

लीपो ददृशे गुरुं अरुंधत्यासहासीनं सावित्र्येव पितामहं तौ गुरुपत्नीगुरुं च मुनिपत्नीवि

प्रोषतः स्थितौ तस्य समीपे तु प्रीत्याचानंदितौ नयोः दिलीपं च तद्दाम्पत्यं धर्मं लोकपाल

कं प्रपप्रच्छ कुशलं राज्ये वसुधायां शुभो मुनिः दिलीप उवाच कुशलं मे सदा दैवस्थितेन

त्वयि गुरो सति सुराणां च मनुष्याणां विपदां रक्षि नामवान् विषये मम कांतायामप

कि त्यं किं न जायते न कार्यं धरित्र्यामिति राज्ञाः पितरो मम तथाकुरुष्व मुनिश्रेष्ठ पुत्रो भवतु मे

यथा राज्ञां विपदि संप्राप्ते त्वं दत्तं सुखं मुनेः स्वामिन् यथैव युधिष्ठिर तदा मुनिः क्षणं तस्थौ दि

ध्यानस्तिमितलोचनः कारणं संततेराज्ञो वदेति कथितं तदा मुनिर्दृष्ट्वा समाधिना प

श्चात्तिवेदितं तस्मै दिलीपाय प्रयत्नतः वसिष्ठ उवाच पूर्वं त्वं शक्रमाराध्य वसुधां गच्छ

रा० म० २३८

न्स्तव अभूत्कल्पद्रुमस्याधः कामधेनुर्नवंदिता जातस्तस्यास्त्वत्कोपो दत्तस्त्वं शापईदृ

दृशः न वंदिता हं भवता सा प्रजनं यदि भूमिप भविष्यति न ते पुत्रस्तच्छापो न श्रुतस्त्वया

या ५

अथैदंश्पाद्युक्रम् अथगवरात्राचारप्रारंभगोत्रिरात्रव्रतं युधिष्ठिरउवाच येनापिलक्ष्मीः
सकलानराणांभुवनेभवेत् संततिर्वर्द्धते स्त्रीणां तद्व्रतं वदमेप्रभो श्रीकृष्णउवाच शृणु
राजन्प्रवक्ष्यामि व्रतानामुत्तमं व्रतं येनवै क्रियमाणेन सर्वपापक्षयोभवेत् गोत्रिरात्रमि
तिख्यातं नरस्त्रीफलदायकं वांछितंजायतेयद्वैतेनचेतन्निवर्त्तते युधिष्ठिरउवाच
कीदृशंतद्व्रतंदेवविधानंतस्यकीदृशं कथमेषासमुत्पन्नाकस्मिन्कालेतुकेशव श्रीकृ
ष्णउवाच पुराकृतयुगेपार्थमनुर्नामबभूवह वैवस्वतकुलेजातोबभूवपृथिवीपतिः त
दन्वयेभवत्दिलीपंपतिसत्तमः नृपाः सर्वेवध्रूं तस्यसंजाताः करर्दयकाः नित्यंध
र्मपरोराजाप्रजानां ४ भ्र ४ योमनीषिणां नजायतेतुसंतानंतस्यैवंवर्त्ततः सदा वांछितंत
नयंतेनदत्तामंवसिष्ठकोशाला सपुत्रार्थंसपत्नीकोवसिष्ठस्याश्रमंययौ पप्रच्छ न्दिपषि
कल्याणंसारस्वैःस्मारणंकृतं विविधानिचकृत्वाणिमार्गेषुफलितानिवै सराज्ञामहि
धीमान्दूरयात्राद्विःसुवाहनः संध्यायांयोगिनस्तस्यमहर्षेः आपदाश्रमं सारथिंचसमो

र्णमिदं व्रतं वैधृतेनापि द्विजेन्द्रेण मोक्षार्थमनितियत्नतः कृतमेतद्व्रतं पूर्वं सर्वाभीष्टफलप्रदं भुक्तिः
प्राप्ताचतेनापि व्रतस्यास्य प्रभावतः यं यं कामं समुद्दिश्य व्रतमेतदनुत्तमं यः करिष्यति तं
कामं समवाप्नोति निश्चितं इदं व्रतं महेशेन समाख्यातमुमां प्रति कुमार्य . समाख्या
तमुमया येन व्रतं नृप नंदिकेशाय कथितं मे पैतन्न व्रतं ततः नंदिकेशेन कथितं दुर्वा
सेमुनये व्रतं दुर्वाससापि कथितं मगस्त्याय व्रतोत्तमं व्रतं तत्सागरे महामुगस्त्येन
महात्मना मयातिखिन्नचित्ताय विलवे कथितं पुरा तेन चीर्णं व्रतमिदं सर्वसौभा
ग्यदायकं व्रह्मलोककथितं पूर्वमिदमेव व्रतं मया तेन चीर्णं व्रतं सांगं वाणी प्राप्त्यर्थ
मादरात् सूर्यायेंद्राय चंद्राय मयैतत्कथितं व्रतं तैश्च चीर्णं व्रतमिदं सर्वसौभाग्यदा
यकं कश्यपादिमुनिभ्यश्च कथितं व्रतमुत्तमं तैश्च चीर्णं व्रतं सम्यग्भुक्तिमुक्तिफ
लप्रदं भूपव्रतानि संत्येव बहूनि विविधानि च तथाप्येतद्व्रतसमं व्रतं नास्त्येव
सर्वथा भवानपि कुरुष्वेत्याभूपाल व्रतमुत्तमं इदं व्रतं शिवदत्तेन यः करिष्यति ।

तोतिदुःखितो विष्णुः अल्पपल्वलमाश्रितः उवास विपिने घोरे स्वकृतं कर्म संस्मरन् ततः
कदाचिद्भूपाल मयात्वन्नगतं पुरा तदा मामागतं दृष्ट्वा पूजयामास मां हरिः ततोऽश्रुपूर्ण
नयनः कृतांजलिपुटो हरिः जगाद पूर्ववृत्तांतं स्वलक्ष्मीनाशकारणं ततोऽतिक्रांत
चिन्ताय विष्णवे व्रतमुत्तमं तन्मुखेन मया भूपकथितं सादरं मया ततो विलंबं विधि
वच्चकार श्रद्धयान्वितः ततः प्रसन्नो भगवान् हरये पार्वतीपतिः ददौ लक्ष्मीं सगरुडं
करुणानिधिरव्ययः इदमेव व्रतं चीर्णमिंदुणापि हृतौजसा तेन प्राप्तं हृतं स्वर्गं स्व
र्गभोगाश्च शाश्वताः ब्रह्मणापि पुराचीर्णमिदमेव व्रतं नृप नष्टा वागीश्वरी तेन संप्रा
ली प्ता डंभापि सा मुनिभिश्च पुराचीर्णं व्रतमेतन्मुमुक्षुभिः अस्य व्रतस्याचरणान्मुक्तिं
प्राप्ता मुनीश्वराः इदं व्रतं प्रयत्नेन यः करोति च भक्तितः तस्य सौभाग्यसंपत्तिर्भविष्य
त्येव सर्वथा यस्यास्ते स्वर्गभोगेच्छा मोक्षेच्छाप्यनपायिनी यस्य सर्वाधिपत्येच्छा तेन
कार्यमिदं व्रतं प्रारब्धे नाम विप्रोऽभूद्वेदवेदांगपारगः सोऽर्थार्थमतियत्नेन तेन ची

नं ४२

व्र०
३२७

नित्वा पंसरव्यकान् अप्सरोभिः परिवृतः स्वर्गलोके महीयते इत्थं आरोग्यमायुष्यं पुत्रपौत्रादिसंपदः लभेत्
तिव्रतमाहात्म्यात् कैलश्रेष्ठशृंगिणा स्वयं लैंगे निशीथे वरदा लक्ष्मीः कोजागर्ति भाषिणी जगति भ्रमते
तस्यां लोकचेष्टाविलोकिनी नालिकेरोदकं पीत्वा अक्षक्रीडां समाचरेत् तस्मै वित्तं प्रयच्छामि कोजा
गर्ति महीतले इति कोजागरव्रतं इति श्रीमद्भट्टनीलकंठात्मजभट्टशंकरकृते व्रतार्के पूर्णिमा
व्रतानि अथामावास्याव्रतानि तत्र पूर्णिमांतमासेन कार्तिककृष्णामायां प्रभवति तैलाभ्यं
गस्नानं भविष्योत्तरे चतुर्दशीस्नानमभिधाय तथाच एवं प्रभातसमये त्वमावास्यां नराधिप स्ना
त्वा देवान्पितॄन्भक्त्या संपूज्य च प्रणम्य चेति एवमित्यनेन तैलाभ्यंगादेरत्रिदेशः अस्यामे
व प्रदोषसमये दीपदानादिकार्यं तथा चामात्र कृत्यादित्यपुराणे दिवा तत्र न भोक्तव्यं ऋते बा
लातुरजनात् तत्रामावास्यांप्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमं दीपवृक्षास्तथा कार्याः
शक्त्या देवगृहेषु च वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः दीपमालापरिक्षिप्तप्र
देशेन तदनंतरं ब्राह्मणान्भोजयित्वादौ संभोज्य च बुभुक्षितान् अलंकृतेन भोक्तव्यं नववस्त्रोप
शोभिना स्निग्धैर्मुग्धैर्विदग्धैश्च निवेदितैर्भृत्यैः सहेति अत्र प्रदोषस्य कर्मकालत्वात्प्रदोष

राम
३२७

भक्तितः तस्यसर्वार्थसंपत्तिर्भवत्येवनसंशयः शिवउवाच इतितद्वचनंश्रुत्वासराजाप्रीतमानसः
सपुत्रःपूजयामासगौतमंशैवपुंगवं ततोधर्मव्रतंदेवमुपदिश्यसगौतमः पुनःसंपूजितोरा
ज्ञास्वाश्रमंप्रतिसंययौ राजासपुत्रस्सद्भक्त्या दुर्ममाहेश्वराभिधं व्रतंचकारविधिवद्यथा
क्रममतन्द्रितः सामनन्यहृदयाः सकलामरेशं संपूजयंतिसततंधृतभस्मपुंड्राः तेमामुपे
त्यविगताखिलदुःखबंधा मद्रूपमेत्यसुखिनोनिवसंतिनित्यम् इतिशिवरहस्येउमामाहे

पै

श्वरव्रतं इदंकश्मीरकेप्रसिद्धं अथाश्विनपौर्णमास्यांकोजागरव्रतं स्कांदे अस्तिकोजा
गरंनामव्रतानामुत्तमंव्रतं यत्कृत्वासर्वमाप्नोतिजंतुर्लोकानुत्तमान् पूर्णिमाश्वयुजे
मासिकौमुदीपरिकीर्तिता तदाराध्यमहालक्ष्मीमिंद्रमैरावतस्थितं उपवासंप्रकुर्वीतदी
पान्दद्याच्चभक्तितः लक्षंतदर्धमयुतंसहस्रशतमेवच दीपाःपुरेवीथीषुदीपकाः देवता
यतनेचैवआरामेषुगृहेषुच ततःप्रभातेसुस्नातःसंपूज्यचशतक्रतुं ब्राह्मणान्भोजयेद्दी
रघृतशर्करपायसैः वासोभिर्दक्षिणाभिश्चसवस्त्रान्पूजयेद्द्विजान् यथाशक्तिचदत्त्वादी
पाःस्वर्णविनिर्मिताः एवंविधिंविनिर्वर्त्यततःपारणमाचरेत् व्रतस्यास्यविधानेनकल्पा
घृतेनदीपयेद्दीपान्तिलतैलेनवाव्रती रात्रौजागरणंकुर्यान्नृत्यगीतपुरस्सरं यथाविभवतो ४४

व्र०
३२८

चरेदिति अकरणेऽप्यनिष्टमप्याह वृद्धवसिष्ठः वत्सरादौ वसंतादौ वलिराज्ये तथैव च तैलाभ्यंग
मकुर्वाणो नरकं प्रतिपद्यत इति अत्र पूर्वविद्धा ग्राह्या पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दि
नमिति वृद्धवसिष्ठोक्तेः अस्यामेव द्यूतमुक्तमादित्यपुराणे कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि स
त्यवत् शंकरस्तु पुरा द्यूतं ससर्ज सुमनोहरं जितश्च शंकरस्तत्र जयं लेभे च पार्वती तस्मा
द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः पराजयो विरु
द्धे तु लब्धनाशस्ततो भवेत् श्रोतव्यं गीतवादित्रादि स्रग्लिप्तैः स्वलंकृतैः विशेषवस्त्रभोक्त
व्यं प्रशस्तैर्बांधवैः सह तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनं गंधैर्वस्त्रैस्तथा पुष्पैर
त्नमाल्यैरलंकृतं दीपमालापरिक्षिप्तं तथा धूपेन धूपितम् दयिताभिस्समं हितैर्नयामा
वमेवं निशा नवैर्वस्त्रैः समं पुष्पाद्विजसंबंधिबांधवा इति अस्यामेव रात्रौ बलिपूजो
क्ता भविष्ये कृतैकतत्सर्वमेव हरात्रौ दैत्यपतेर्बलेः पूजां कृत्वा नृपः साक्षात् भूमौ मंडलके
कृते बलिमालिख्य देवेन्दु वर्णकैः पंचरंगकैः सर्वाभरणसंपूर्णं विंध्यावल्या समन्वितं कृ

राम
३२८

व्यापिनी ग्राह्या। दिनद्वयेन व्याप्तौ उत्तरैव कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः भोज्यैर्नानावि
धैर्विप्रान्भोजयित्वा क्षमापयेत् ततोऽपराह्णसमये घोषयेन्नगरे नृप इत्यादि राज कर्तव्याभिधानम
ध्ये दीपमालाकुलेरम्ये विध्वस्तध्वांतराद्ये प्रदोषे दोषरहिते शुभा स्तदोषागमे शुभे इत्यनेन पार्वण
श्राद्धानंतर्या   नुगृहात् ज्योतिर्निबंधे च स्मृतेः अमायामाश्विने मासि पितृकर्म विधाय च दी
पदानं ततः कुर्यात्प्रदोषे वत्र पाल्लुकमिति यूदा तु पूर्वेद्युरेव प्रदोषे तत्र पूर्वेद्युरेव दीपदानं तत्
परदिने तु पार्वणश्राद्धं नरकमेस्प कालाद्दुर्बलत्वात् अखंडामायाराज्ञाथो व्यवहार्यत्वेन
प्राप्तत्वात्कर्मस्याविधेयत्वाच्च दिनद्वये तद्व्याप्तौ पूर्वैव गौणकाले सत्वादिति तातचरणाः उल्को
म दानमपि प्रदोषव्यापिन्यामेव कार्यं तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः उल्काहस्ता नराः
कुर्युः पितृणां मार्गदर्शनमिति ज्योतिर्निबंधवचनात् तुलाग्रह   णं प्राप्तस्यार्थं कार्तिक
शुक्लप्रतिपदि तैलाभ्यंगस्नानमुक्तं नारदसंहितायां ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली
भवेत् तैले लक्ष्मीर्जले गंगा दीपावलितिथौ वसेत् अलक्ष्मीपरिहारार्थमभ्यंगस्नानमा

घृष्येतद्वचनात्प्रातःकालव्यापिनी प्रतिपद्ग्राह्येति प्रतिभाति तथापि प्रतिपद्दर्शसंयोगे क्रीडनं तु गवाम
नं परविद्धे युयः कुर्यात्पुत्रदारधनक्षयः याकुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप पूजने चीयते वर्द्ध
ते पुत्रागावो महीपतिः गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमाः सोमो राजा पशून्हंति सुरभी पू
जकं तथेति देवलेन परविद्धा निषेधात् दर्श विद्धे व गृह्या चंद्रदर्शनाभावे तु द्वितीयाविद्धैव कार्या त्रि
याममात्रदर्शेति थिर्भवेद्धेत्सार्द्धत्रियामा प्रतिपद्विवृद्धौ दीपोत्सवे तेम निमः प्रदिष्टे प्रतीतोन्यथा पूर्व
युते विधेये वर्द्धमानतिथौ न हि यदि सार्द्धत्रियामका द्वितीया वृद्धिगामिन्या उत्तरा तत्र चोच्यते
इति मदनरत्नधृतवचनात् तेद्दर्शप्रतिपदो तथा च ततोपरान्हसमये घोषयेन्नगरे नृपे त्या
दिना विहितराजकर्तृकं कर्म प्रतिपद्विहितगोक्रीडनं च दीपोत्सवपदेनोच्यते न तु दीपदानेन
थासति तत्र विहितगोक्रीडनं च दीपोत्सवपदेनोच्यते न तु दीपदानं तथासति तत्र विहित प्र
दोषकालव्याप्तिप्रसंगात् नीराजनमंगलमालिके तु तत्र स्यामेव कर्तव्ये तथा च ब्रह्मपुरा
णे कार्त्तिके शुक्लपक्षे तेन विधानात् हूतयं हि तत् नारी नीराजनं प्रातः सायं मंगलमालिक

ण्डवाणजंभोरुमुरदानवसंवृते संपूर्णहृष्टवदनकिरीटोत्कटकुंडला द्विभुजं दैत्यराजानं का
रयित्वा नृपः स्वयं गृहस्य मध्ये शालायां विशालायां ततोर्चयेत् लोकस्यापि गृहस्यांतःशय्या
यां शुक्लतंडुलैः संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् पंचरंगकृतो मूर्त्तिर्या राजा वा पू
जयेत् अन्यस्तु श्लोकः शुक्लतंडुलकृतामित्यर्थः बलिपूजामंत्रः पाद्मे बलिराज नमस्तुभ्यं
दैत्यदानववंदित इंद्रशत्रोमराराते विष्णुसान्निध्यदो भवेति बल्युद्देशेन दीपदानमुक्तं वा
मनपुराणे कार्त्तिकशुक्लपक्षे प्रकृत्य वीरप्रतिपदं प्राप्य तन्नाम्ना भावी महोत्सवः तत्र त्वं नरशार्दू
लहृष्टाः पुष्टाः स्वलंकृताः अर्घ्यदीपप्रदानेन अर्चयिष्यति मानवः बलिराज नमस्तुभ्यं वि
रोचनसुतप्रभो भविष्येंद्र सुराराते पूजेयं प्रतिगृह्यतामिति गोवर्द्धनपूजादि स्कांदे प्रात
र्गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत् पूजनीयास्तथा गावस्त्याज्ये वाहनदोहने इति पुरा
णसमुच्चये न दोहयेत्तत्रैव पूजयेत्सुरभिस्तिष्येति तथा स्त्रियः क्रीडन्त्यमावास्यां गावो
नेदासुका र्त्तिके इति नंदाप्रतिपत् तत्संबंधिन्युदये सूर्योपलक्षिते प्रातःकाले य

देव बुधश्रवणसंयुक्ताद्वादशीसर्वकामदा दानेंदध्योदनं शस्तमुपवासः परोविधिः सगरे

णककुत्स्थेन धुंधुमारेण गाधिना राजेश्चान्यैश्च राजेंद्रकामदा द्वादशीकृता यावद्दशीवुध

युता श्रवणेन सार्द्धसा वैजयंति कथिता मुनिभिर्नभस्ये तामादरेण समुपोष्य नरोहि सम्यक्

प्राप्नोति सिद्धिमणिमादि गुणोपपन्नाम् इतिहेमाद्रौ भविष्योत्तरे श्रवणद्वादशीव्रतम् अ

थामेव वामनजयंती व्रतं हेमाद्रौ भविष्योत्तरे श्रीकृष्ण उवाच द्वादश्यां तेविधिः प्रोक्तः श्र

वणेन युधिष्ठिर सर्वपापप्रशमनः सर्वसौख्यप्रदायकः १ एका दशीयदामासश्चश्रवणे

न समन्विता विजयासा तिथिः प्रोक्ता भक्तानामभयप्रदा २ पुरा देवगणैः सर्वैः समेत्य च यु

धिष्ठिर वरदः प्रार्थितो विष्णुरिन्द्राग्न्यनिलसंयुतैः ३ बलवानजितो दैत्यो बलिर्नाम महाव

लः तेन दे[illegible] वगणाः सर्वे पातिता निजमंदिरम् ४ त्वं गतिः सर्वदेवानां शीघ्रं कष्ट

ज्यो:
२२६

समुद्धर जगति दैत्यंमहावाहोवलिंवलव ॥ इदंपत्रंत्रुटि
हृतं २२६ पत्रस्यद्वितीयपृष्ठस्थमपेक्षते: ॥

२२६

समुद्र जनि देत्यम हावा हेव लिंव लव × इदं पत्रं त्रुटि

तं २२६ पत्रस्य द्वितीयपृष्ठे ग्रथमपि क्षेः ×

२२६